CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 273

Title Kāvya Prakāśa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 273 Subject: Grammar.

Title: Kavya Prakāśa

Author: Mummata Scribe:

Date of the work: Date of the Ms.:

Place of the work: Place of the Ms.:

Size: 10.6" by 4.8" Extent: 110 foll

Language: Sanskrit Script: Devanāgari

Remarks: —

१ ॥ ॥ श्री विघ्नहर्त्रे नमः ॥ ग्रंथारंभे विघ्नविघाताय समुचितेष्टदेवतां ग्रंथकृत्परामृश
ति ॥ नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्रां ॥ नवरसरुचिरां निर्मितिमाद
धती भारती कवेर्जयति ॥१॥ नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावा परमाण्वा
द्युपादानकर्मादिसहकारिकारणपरतंत्रा षड्रसा न च हृद्यैव तैः तादृशी ब्रह्मणो निर्मि
तिः एतद्विलक्षणा च कविवाङ्निर्मितिरतएव जयति । जयत्यर्थेन च नमस्कार आक्षिप्यत इ
ति तां प्रत्यस्मि प्रणत इति लभ्यते ॥ इहाभिधेयं सप्रयोजनमित्याह ॥ काव्यं यशसेऽर्थकृते व्य
वहारविदे शिवेतरक्षतये ॥ सद्यः परनिर्वृतये कांतासंमिततयोपदेशयुजे ॥२॥ कालिदासादीना
मिव यशः । श्रीहर्षादेर्धावकादीनामिव धनं । राजादिगतोचिताचारपरिज्ञानं । आदित्यादेर्मयू
रादीनामिवानर्थनिवारणं । सकलप्रयोजनमौलिभूतं समनंतरमेव रसास्वादनसमुद्भूतं वि
गलितवेद्यांतरमानंदं । प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यव १

त्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसांगभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लो
कोत्तरवर्णनानिपुणकविकर्म तत्कांतेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणा
दिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयं ॥ अस्य कारणमा
ह ॥ शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् । काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३॥ शक्तिः
कवित्वबीजरूपः संस्कारविशेषः । यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात् । लोकस्य स्थावरजं
गमात्मकस्य लोकवृत्तस्य । शास्त्राणां छंदोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्ष
णग्रंथानां । काव्यानां महाकविसंबंधिनां आदिग्रहणादितिहासादीनां च विमर्शनाद्व्युत्पत्तिः
काव्यं कर्तुं विचारयितुं च ये जानंति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः स
मुदिताः । न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः ॥ एवमस्य कारणमुक्त्वा
स्वरूपमाह ॥ तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ॥ इति ॥ दोषगुणालंकारा वक्ष्यंते ॥

[illegible] दृष्टं वंधं ओतुं शोभाप्रवर्तितः शास्त्रादितो तेन च [illegible]
इदमितिकाव्यं ५

का०प्र० २

प्रीत्यर्थंनेनैतदाहौ यस्तु सर्वत्र सालंकारौ क्वचित्तु स्फुटालंकारविरहेपि न काव्यत्वहानिः। यथा॥ यः कौमा
रहरः स एव हि वरस्ता एव चैत्रक्षपास्तेचोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः। सा चै
वास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते॥१॥
अत्र स्फुटो न कश्चिदलंकारः। रसस्य च प्राधान्यान्नालंकारता। तद्भेदान्क्रमेणाह॥ इदमुत्तममतिश
यिनि व्यंग्ये वाच्याद्ध्वनिर्बुधैः कथितः॥४॥ बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यंग्यव्यंजक
स्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यंग्यव्यंजन
क्षमस्य शब्दार्थयुगलस्य। यथा॥ निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोधरो नेत्रे दूरमनंज
ने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमा वापीं स्नातुमितो
गतासि न पुनस्तस्याधमस्यांतिकं॥२॥ अत्र तदंतिकमेव रंतुं गतासीति अधमपदेन प्र
धान्येन व्यज्यते॥ अतादृशि गुणीभूतव्यंग्यं व्यंग्ये तु मध्यमं॥ अतादृशि वाच्यादनतिश

श्री
[illegible]
२

आलंकारिकैः [illegible]

नवं
उ२

यिनि। यथा॥ ग्रामतरुणं तरुण्या नववंजुलमंजरीसनाथकरं। पश्यंत्या भवति मुहुर्नितरां मलिना मुखच्
छाया॥३॥ अत्र वंजुललतागृहे दत्तसंकेता नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव च
मत्कारित्वात्॥ शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतं॥ चित्रं गुणालंकारयुक्तं। अव्यंग्यमिति स्फु
टप्रतीयमानार्थरहितं। अवरं अधमं॥ यथा॥ स्वच्छंदोच्छलदच्छकच्छकुहरच्छातेतरांबुच्छटामूर्छ
न्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः॥ भिद्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमे
दुरमदा मंदाकिनी मंदतां॥४॥ विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य यदृच्छयापि यं॥ स
संभ्रमेंद्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती॥५॥ इति काव्यप्रकाशे काव्यप्रयोजन
कारणस्वरूपनिर्णयो नाम प्रथम उल्लासः॥१॥ क्रमेण शब्दार्थयोः स्वरूपमाह॥ स्याद्वाचको लाक्षणि
कः शब्दोत्र व्यंजकस्त्रिधा॥ अत्रेति काव्ये। एषां स्वरूपं वक्ष्यते। वाच्यादयस्तदर्थाः स्युः। वाच्य

५ म ह
[illegible]
स्फुट [illegible]

[illegible]

का॰प्र॰ सर्व्वं तात्पर्य्यार्थोपि केषुचित ॥ आकांक्षासन्निधियोग्यतावशाद्वक्ष्यमाणस्वरूपाणां
३ पदार्थानां समन्वये तात्पर्य्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः समुल्लसतीत्यभिहितान्व
यवादिनां मतं वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः सर्वेषां प्रायशोर्थानां व्यंजक
त्वमपीष्यते तत्र वाच्यस्य यथा ॥ माए घरोवअरणं अज्जहु णत्थित्ति साहियं तुमए । ता भण किं
अ ५ करणिज्जं एमे ण वासरो ठाई ॥ १ ॥ अत्र स्वैरविहारार्थिनीति व्यज्यते । लक्ष्यस्य यथा ॥ साहेंती स
भा ५ हि सुहअं खणे खणे दूमिया सि मज्झ कए । सब्भावणेहकरणिज्ज सरिसयं दाव विरइयं तुमए ॥
अत्र मत्प्रियं रमयंत्या त्वया शत्रुत्वमाचरितमिति लक्ष्यं तेन च कामुकविषयसापराधत्वप्र
३ एवी काशनं व्यंग्यं व्यंग्यस्य यथा ॥ उअ णिच्चलणिप्पंदा बिसिणीपत्तम्मि रेहइ बलाआ । णिम्मल
मरगईभायणपरिट्ठिया संखसुत्तिव्व ॥ अत्र निष्पंदत्वेनाश्वस्तत्वं तेन जनरहितत्वमतः संकेत
स्थानमेतदिति कयापि कंचित्प्रत्युच्यते अथवा मिथ्या वदसि न त्वमत्रागतो भूरिति व्यज्यते

साधयंती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते सद्भाव
स्नेहकरणीय सदृशं तावद्विरचितं त्वया ॥ ५

पश्य निश्चलनिस्पंदा बिसिनीपत्रे राजते बलाका निर्मलमरकतभाजनपरिस्थिता शंख
शुक्तिरिव ॥ ३

तेषां वाचकादीनां क्रमेण स्वरूपमाह ॥ साक्षात्संकेतितं योर्थमभिधत्ते स वाचकः ॥ ७ ॥ इहागृहीतसंके
तस्य शब्दस्यार्थप्रतीत्यभावात्संकेतसहाय एव शब्दोर्थविशेषं प्रतिपादयतीति यस्य यत्राव्य
संकेतः वधानेन संकेतो गृह्यते स तस्य वाचकः ॥ संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ॥ यद्यप्यर्थक्रियाका
रितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाप्यानंत्याद्व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यत इति
६ गौः शुक्लश्चलो डित्थ इत्यादीनां शब्दानां विषयविभागो न प्राप्नोतीति च तदुपाधावेव संकेतः उपाधिश्च
द्विविधः वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च वस्तुधर्मोपि द्विविधः सिद्धः साध्यश्च सिद्धोपि पदार्थस्य
प्राणप्रदो विशेषाधानहेतुश्च तत्राद्यो जातिः उक्तं हि वाक्यपदीये ॥ गौः स्वरूपेण न गौर्नाप्यगौः
गोत्वाभिसंबंधात्तु गौरिति द्वितीयो गुणः । शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते साध्यः पू
र्वापरीभूतावयवः क्रियारूपः डित्थादिशब्दानामंत्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा [illegible]
रूपं च [illegible]

का॰प्र॰ याडित्थादिसंज्ञार्थेषूपाधित्वेन संनिवेश्यत इति डित्थादिरूपो यदृच्छात्मक इति गौः शुक्लश्चलो डि
४ त्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः परमाण्वादीनां तु गुणमध्यपाठात्पा
रिभाषिकं गुणत्वं गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद्भेद इव लक्ष्यते यथै
कस्य मुखस्य खड्गमुकुरतैलाद्यालंबनभेदात् हिमपयःशंखाद्याश्रयेषु परमार्थतो भिन्नेषु शु
क्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यं
मे ४ गुडतंडुलादिपाकादिष्वेवमेव पाकत्वादि बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु प्रतिक्षणं भिद्यमा
नेषु डित्थाद्यर्थेषु वा डित्थत्वमस्त्येवेति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये तद्वानपो
हो वा शब्दार्थः कैश्चिदुक्त इति ग्रंथगौरवभयात्प्रकृतानुपयोगाच्च न प्रदर्शितं ॥ स मुख्योऽर्थ
स्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥ स इति साक्षात्संकेतितः । अस्येति शब्दस्य ॥ मुख्यार्थ

बाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥ कर्मणि कुश
ल इत्यादौ दर्भग्रहणाद्ययोगात् । गंगायां घोष इत्यादौ च गंगादीनां घोषाद्यधिकरणत्वासंभवान्मु
ख्यस्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च संबंधे रूढितः प्रसिद्धेः तथा गंगातटे घोष इ
त्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मने
प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत्स आरोपितः शब्दव्यापारः सांतरार्थनिष्ठो लक्ष
णा ॥ स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं । उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ १ ॥
कुंताः प्रविशंति यष्टयः प्रविशंतीत्यादौ कुंतादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पु
आक्षिप्यंते २ रुषा लक्ष्यंते तत उपादानेनेयं लक्षणा । गौरनुबंध्य इत्यत्र श्रुतिचोदितमनुबंधनं कथं मे
स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते । विशेष्यं नाभिधा गच्छेत्क्षीणशक्ति

प्र० ५

विशेषणाद्इत्याद्युपादानलक्षणा तु नोदाहर्तव्या न ह्यत्र प्रयोजनमस्ति न वा रूढिरियं । अ
व्यक्त्यविनाभावात्तु जात्या व्यक्ति[illegible]राक्षिप्यते ॥ यथा क्रियतामित्यत्र कर्ता कुर्वित्यत्र
कर्म प्रविश पिंडीमित्यादौ गृहं भक्षयेत्यादि च । पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र रा-
त्रिभोजनं न लक्ष्यते । श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषय[illegible]त्वात् । गंगायां घो
ष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गंगाशब्दः स्वार्थमर्पयतीत्येवमादौ ल
क्षणेनैषा लक्षणलक्षणा । उभयरूपा चेयं शुद्धा । उपचारेणामिश्रितत्वात् । अनयोर्भेदयोर्ल
क्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यं । तटादीनां गंगादिशब्दैः प्रतिपादने तत्त्वप्र
तिपत्तौ हि प्रतिपिपाद[illegible]यिषितप्रयोजनसंप्रत्ययः । गंगासंबंधमात्रप्रतीतौ तु गं
गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ॥ सारोपान्या तु यत्रोक्तौ वि

शाब्दलक्षणा ४ — अर्थलक्षणा ४ — उपचारमिश्रा गौणी ५ — सारोपा साध्यवसाना

प्र० प्रतिपादयः १ — अर्थात् गौणी १ — शैत्यपावनत्वादि २ — अभेदबुद्धिविषयीकृते... २ — एतद्देवविशेषद्वयोरिति २ — भेदाभेदरूपत्वं... मते निराकृतोऽस्ति

[illegible] ५

भेदाविमौ च सादृश्यात्संबंधांतरतस्तथा । गौणौ शुद्धौ च विज्ञेयौ । आरोपाध्यवसानरूपौ ॥१२
विषयोगवृत्तिः १ — कारिका १ — अन्यस्यान्यतादात्म्यप्रतिपत्तिः साध्यवसाना ३

षयी विषयस्तथा । आरोप्यमाण आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्ये
न निर्दिश्येते सा लक्षणा सारोपा । विषय्यंतःकृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका ॥११॥
विषयिणारोप्यमाणेनान्तःकृते निगीर्णेऽन्यस्मिन्नारोपविषये सति सा साध्यवसाना ॥ भे
दाविमौ तु सादृश्यहेतू भेदौ । गौर्वाहीक इति गौरयमिति च । अत्र स्वार्थसहचारिणो
गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमु
पयान्तीति केचित् । स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभि
धीयत इत्यन्ये । साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यत इत्यपरे । उक्तं चान्यत्र अभि
धेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता इति । अवि
नाभावोऽत्र संबंधमात्रं न तु नान्तरीयकत्वं तत्त्वे हि मंचाः क्रोशन्तीत्यादौ लक्षणा न स्या

भेदेनानुपस्थितेः — साध्यवसाना ४ — जाड्यादिभिः २

व्याप्तिः १ — शक्यसंबंधात्‌ २

सा॰ ३

का॰प्र॰ ता अविनाभावे चात्र रोपे गौणवसिद्धे लक्षणाया नोपयोग इत्युक्तं। आयुर्घृतं आयुरेवेदं मि
६ त्यादौ सादृश्याद्यन्य कार्यकारणभावादि संबंधात् रूप एवमादौ च कार्यकारणभावादि सं
बंधपूर्वक आरोपाध्यवसाने॥ अत्र गौणभेदयोर्भेदे पिताद्रूप्यप्रतीतिः। सर्वथैवाभेदा
वगमश्च प्रयोजनं। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि
गत्ति चित्ताद्रूप्यादुपचारः यथेंद्रार्था स्थूणा इंद्रः॥ क्वचित्स्वस्वामिभावाद्यथा। राज
कीयः पुरुषो राजा॥ क्वचिदवयवावयविभावाद्यथा अग्रहस्त इत्यत्र अग्रमात्रेऽवय
वे हस्तः। क्वचित्तात्कर्म्याद्यथा। अतक्षा तक्षा॥ लक्षणा तेन षड्विधा। आद्यभेदाभ्यां
सह। सा च व्यंग्येन रहिता। तस्तदौ सहिता तु प्रयोजने॥ प्रयोजनं हि व्यंजनव्यापारगम्य
मेव। तच्च गूढमगूढं वा। तच्चेति व्यंग्यं। गूढं यथा॥ मुखं विकसितस्मितं वशितव क्रि

आरूढवक्षः ... उपदिशति कामिनीनां यौवनमद एव ललितानि॥ ४२

म प्रेक्षितं मुकुलितविभ्रमा गतिरपास्तसंस्थामतिः। उरो मुकुलितस्तनं जघन[illegible]बंधो
द्धुरबतेंदुवदनातनौ तरुणिमोद्गमो मोदते॥ [illegible]
ललितानि॥ अत्रोपदिशतीत्यनायासेन शिक्षादानमभिव्यंग्यं स्फुटं प्रतीयते। तदेषा कथि
ता त्रिधा॥ अव्यंग्या गूढव्यंग्या चातद्रूला रूढिकः शब्द इति संबध्यते। तद्भूस्तदाश्रय
तत्र व्यापारो व्यंजनात्मकः कुत इत्यत आह॥ यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते
फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया॥ प्रयोजनप्रतिपिपादयिषया यत्र लक्षणाशब्दप्र
योगस्तत्रेनान्यतस्तत्प्रतिपत्तिः। अपितु तस्मादेव शब्दान्तचात्र व्यंजनादृतेऽन्यो व्यापारः।
ह्रीनाभिधासमयाभावात्॥ गंगायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयं
ते तत्र गंगादिशब्दाः संकेतिताः॥ हेत्वभावान्न लक्षणा॥ मुख्यार्थबाधादित्रयं हेतुः। तथा च

का॰प्र॰
९

तेष्वंनमुख्यंनाप्यत्रबाधायोगःफलेननोनप्रयोजनमेतस्मिन्नचशब्दःस्खलद्गतिःयथा।
गंगादिशब्दःस्रोतसिसबाधइतितटंलक्षयतितद्वद्यदितटेपिसबाधःस्यात्तत्प्रयोजनं
लक्षयेत्।नचतटंमुख्योर्थोनाप्यत्रबाधःनचगंगाशब्दार्थस्यतटस्यपावनत्वाद्यैर्लक्षणी
यैःसंबंधः।नापिप्रयोजनेलक्ष्येकिंचित्प्रयोजनमस्ति।नापिगंगाशब्दस्तटमिवप्रयोजनं
प्रतिपादयितुमसमर्थः।एवमप्यनवस्थास्यात्यामूलक्षतिकारिणी।एवमपिप्रयोज
नंचेल्लक्ष्यतेतत्प्रयोजनान्तरेणेतिप्रकृताप्रतीतिकृदनवस्थाभवेत्।ननुपावनत्वादिध
र्मयुक्तएवतटंलक्ष्यतेगंगायास्तटेघोषइत्यतोधिकस्यार्थस्यप्रतिपत्तिश्चप्रयोजनमितिविशि
[illegible]।ज्ञानस्यविषयोह्यन्यःफलमन्यदुदाहृतंप्रत्यक्षादेर्नीलादिर्विषयः
फलंतुप्रकटतासंविन्निर्वा।विशिष्टेलक्षणानैवंव्याख्यातं।विशेषाःस्युस्तुलक्षिते।तटा राम॰ ९
एवंलक्षणामूलंव्यंजनंनेत्युक्तआह।प्रयोजनेनसहितंलक्षणीयंनयुज्यतेकुतइत्यतआह॥४२

वृ॰ल

शिवः

देशं... क... अ...

तेविशेषाःपावनत्वादयस्तेचाभिधानात्पर्यलक्षणाभ्योव्यापारांतरगम्याःतच्चव्यं
जनध्वननद्योतनादिशब्दवाच्यमवश्यमेष्टव्यम्।एवंलक्षणामूलंव्यंजनमुक्तं।अभिधा
मूलंत्वाह॥अनेकार्थस्यशब्दस्यवाचकत्वेनियंत्रिते।संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरं
जनम्॥१॥संयोगोविप्रयोगश्चसाहचर्यंविरोधिता॥अर्थःप्रकरणंलिंगंशब्दस्यान्यस्य
सन्निधिः॥२॥सामर्थ्यमौचितीदेशःकालोव्यक्तिःस्वरादयः।शब्दार्थस्यानवच्छेदेविशेष
स्मृतिहेतवः॥३॥इत्युक्तदिशा।सशंखचक्रोहरिरशंखचक्रोहरिरित्युच्यते।रामलक्ष्मणाविति
दाशरथी॥रामार्जुनगतिस्तयोरितिभार्गवकार्तवीर्ययोः।स्थाणुंभजभवच्छिदेइतिह
रो।सर्वंजानातिदेवइतियुष्मदर्थे।कुपितोमकरध्वजइतिकामे।देवस्यपुरारातेरितिशंभौ।म
धुनामत्तःकोकिलइतिवसंते।पातुवोदयितामुखमितिसांमुख्ये॥भात्यत्रपरमेश्वरइत्यत्र

वी॰

२०

एतेधानीरूपादिशाडजनि।चित्रभानुर्विभातीतिदिनेरवौ।रात्रौवह्नौ।मित्रंभातीतिसुहृदि
रवौभाति।मित्रोवी।इंद्रशत्रुरित्यादौवेदएवनकाव्येस्वरोविशेषप्रतीतिकृत्।आदिग्रहणात्॥
एद्दहमित्तत्थणिआ।एद्दहमित्तेहिंअच्छिवत्तेहिं।एद्दहमित्तावत्था।एद्दहमित्तेहिंदिअहेहिं॥
इत्यादावभिनयादयः।इत्थंसंयोगादिभिरर्थान्तराभिधायकत्वेनिवारितेप्यनेकार्थस्यश
ब्दस्ययत्किंचिदर्थान्तरप्रतिपादनं॥तत्रनाभिधानियमनात्तस्याः।नलक्षणामुख्यार्थबाध
द्यभावादपितुअंजनंव्यंजनमेवव्यापारः।यथा।भद्रात्मनोदुरधिरोहतनोर्विशालवंशोन्नतेः
कृतशिलीमुखसंग्रहस्ययस्यानुपप्लुतगतेःपरवारणस्यदानांबुसेकसुभगःसततंकरोभू
त्।तद्युक्तोव्यंजकःशब्दःयत्सोर्थान्तरयुक्तथा।अर्थोपिव्यंजकस्तत्र
सहकारितयामतः।तथेतिव्यंजकः॥ ॥इतिकाव्यप्रकाशेशब्दनिर्णयोनामद्वि[illegible]

२२

५ अतिपृथुलंजलकुंभंगृहीत्वासमागतास्मिसखित्वरितं।श्रमस्वेदसलिलनिःश्वासनिःसहाविश्राम्यामिक्षणं॥ ओनिद्दंदोब्बल्लंचिंता[illegible]
ममंमंदभागिन्याःकृतेसखित्वामपि[illegible]

देशवैशिष्ट्यस्य
कालवैशिष्ट्यस्य
आदि चेष्टावैशिष्ट्य
वक्तृवैशिष्ट्यस्य उदा २

ध्वनिसंग्रहः॥२॥ ॥अर्थाःप्रोक्ताःपुरातेषां॥अर्थावाच्यलक्ष्यव्यंग्याः।तेषांवाचकलाक्षणिकव्यं
जकानां।अर्थव्यंजकतोच्यते॥कीदृशीत्याह॥वक्तृबोद्धव्यकाकूनांवाक्यवाच्यान्यस
न्निधेः॥प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां॥१॥योर्थस्यान्यार्थधीहेतुर्व्यापारोव्यक्तिरे
वसा॥२॥बोद्धव्यःप्रतिपाद्यः।काकुर्ध्वनेर्विकारः।प्रस्तावःप्रकरणं।अर्थस्यवाच्यलक्ष्यव्यंग्या पा२
त्मनः।क्रमेणोदाहरणानि।अइपिहुलंजलकुंभंघेत्तूणसमागदम्हिसहितुरिअं।समसेयसलि
लणीसासणीसहावीसमामिखणं॥३॥अत्रचौर्यरतगोपनंगम्यते॥ओणिद्दंदोब्बल्लंचिंताअल चौर्य
सत्तणंसणीससिअं।महमंदभाइणीएकेरंसहितुहविअहहपरिहवइ॥अत्रदूत्यास्तत्का बोद्धव्यवैशिष्ट्य उदा४
मुकोपभोगोव्यज्यते॥तथाभूतंदृष्ट्वानृपसदसिपांचालतनयांवनेव्याधैःसार्द्धंसुचिरमुषितंव
ल्कलधरैः।विराटस्यावासेस्थितमनुचितारंभनिभृतंगुरुःखेदंखिन्नेमयिभजतिनाद्यापिकुरु

तममगंदस्वलनमि ओहिरीत नयस्पन्त्र
इदानीं सेवाहस्तो चकपोलोनसाहस्ति ।१२

का॰प्रा॰ ९

बुः ॥१॥ अत्र मत्पयितयोग्यः स्वेदः ऊरुस्तु तुयोग्य इति काकाप्रकाश्यते न वचाच्यसिद्धं गमत्रका । वाक्यवैशिष्ट्य यथा २
ऊरिति गुणा भूतव्यं गपत्तं रांकं । ब्रुम्म मात्रेणापिका को विश्रान्तेः । तईआ महंगंद्वस्वलस्मिमि
अंहिट्ठिा ए तोसिंऋम्मनो । घ्रा इसबेअ अहंतेअ कट्ठो लैंए सादिट्ठी ॥ २ ॥ अत्र मत्सरवाकपोलप्रति
बिंबितां पश्यतस्तेहृष्टिरन्यैवाभूत् । चलितायां तुत स्यां अन्यैव जाते सुहो प्रच्छन्नकामुक संते इ
तिव्यज्यते ॥ उद्देशोयं सरसकदलीओ ओ णाना तिशायी ऊ जो स्कंधो ऊरित्तरमणाविभ्रमोन
र्मदायाः । किं चैतस्मिं सुरतसुहृद्दत्तन्वितेवानिवातायेयामग्रे सरति क[illegible]कांद्रको पोमनो
भूः ॥३॥ अत्र रतार्थं प्रविशेति [illegible] यं पंओ । ण्हेर्ई अग्गुल्लमणा अन्नां भेसकलम्मि घरं भरा
म्मि । खणमेत्तं जई संझाईआ वरहोई ण वहोईवी यामो ॥ ४ ॥ अत्र संध्या संकेतकालइ तितस्थं
प्रति कया चिद्द्योत्पते ॥ सुवईस माग मिस्सङ्कितु रुपियो अज्जुपहरमेत्तेणाए अमेत्तं किंति

स्वयतेसमागमिष्यतितवप्रियोद्यप्रहरमात्रेण ॥ नुदति अनाई मनाः श्वशूर्मंगृहभरे सकले ॥
एवमेवकिमितितिष्ठसितत्सखिसज्जयकरणीयं ४ १ क्षणमात्रं यदि संध्यायां भवति न भवति विश्रामः ३

वाक्यवैशिष्ट्य यथा ५
अन्यसंनिधिवैशिष्ट्य यथा ३
प्रस्तावैशिष्ट्य यथा
लिता
घरभर
णम ९

सूत्र
अहमद्य भयवं
गुरुजनपरवशप्रिय किं न गामि तव भंद भाग्यिन्यह ४ ६
अद्य प्रवासं व्रजसि व्रज स्वयमेव ज्ञानासि करणीयं

चित्तवसितासकिंसत्ते सुकरिराज्जं ॥ अत्रोपयपतिं प्रस्यन्तिसंतुं प्रस्कत्तं नियुक्तमितिनिवार्यते । अन्यत्रन्द
यं ऊसुमावचायकुंरुवं मत्तांस्मि करोमि सख्यः । नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायंरचितोञ्जलि
र्वः ॥ ५ ॥ अत्र विविक्तोयं देश इति प्रच्छन्नकामुकस्त्वया विसर्ज्य इत्याप्तसखीं प्रतिकया चिन्निवेद्य
ते ॥ गुरुयणपरवसपियं किं भणामि तुह मंदभाइणीयं अहं । अज्जपवासं वच्चसि वच्च सयं
चेय मुणसि करणिज्जं ॥ २ ॥ अघ्यमक्षसमयेयदिव्रजसितदहेतावन्नभवामितवानुजानामिमति
मितिव्यज्यते । आदिग्रहणाच्चेष्टादेः । तत्र चेष्टाया यथा । द्वारो पान्तनिरन्तरेमयितयासौंदर्यसारश्रि
याप्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितं । आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चलेलो
चनेवाचस्तदेवनिवारितं प्रसरणं संकोचिते दोर्लते ॥ २ ॥ अत्र वेष्टया प्रच्छन्नकान्तविषयआकू
तविशेषो ध्वन्यते । निराकांक्षप्रतिपत्तये प्राप्तावसरतया पुनः पुनरुदाह्रियते वक्त्रादीनामिथः

देशवैशिष्ट्य यथा २
कालवैशिष्ट्य यथा ४
आक्षेपेन चेष्टावैशिष्ट्य यथा ४

श्वश्रूरत्र निमज्जति अत्राहं दिवस एव प्रलोकय मा पथिक रात्र्यन्ध शय्यायां मम शयिष्यसे॥

का.प्रा. संयोगेद्विकादिभेदेन... नेन कृतेन। लक्ष्यव्यंग्ययोः व्यंजकत्वमुदाहार्यं। वक्तृबोद्धव्ययोः।
१० यथा॥ अत्ता एत्थ णुमज्जइ एत्थ अहं दिअसएं पलोएहि। मा पहिअ रत्तिअंधिअ सेज्जाए मह णुमज्जि
हिसि॥६॥ वक्तृबोधव्यवैशिष्ट्यात्प्रशस्यायामेव यतेति व्यंग्यं। शब्दप्रमाणवेद्योऽर्थो व्यन
क्त्यर्थान्तरं यतः। अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता॥५॥ शब्देति। न हि प्रमाणान्तरवे ९
द्यो व्यंजकः॥ ॥इति काव्यप्रकाशे अर्थव्यंजकतानिर्णयो नाम तृतीय उल्लासः॥३॥ यद्यपि श
ब्दार्थयोर्निर्णये कृते दोषगुणालंकाराणां स्वरूपमभिधातव्यं तथापि धर्मिणि प्रदर्शि
ते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह। अविवक्षितवाच्यो यस्तत्र
वाच्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतं॥२४॥ लक्षणामूलगूढव्यं का. १०
ग्यप्राधान्ये सत्यविवक्षितं यत्र वाच्यं ध्वनावित्यनुवादात् ध्वनिरिति विज्ञेयः। तत्र वाच्यं

स्फार

क्वचिदनुपपद्यमानत्वादर्थान्तरे परिणतं यथा। त्वामस्मि वच्मि विदुषां समुदायोऽत्र तिष्ठ
ति। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्। अत्र वचनादि उपदेशादिरूपतया प
रिणमति। क्वचित्पुनरनुपपद्यमानत्वादत्यन्तं तिरस्कृतं यथा। उपकृतं बहु तत्र किमु
च्यते सुजनता प्रथिता भवता परं। विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः
शरदां शतं। एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति। विवक्षितं चा
न्यपरं वाच्यं यत्रापरस्तु सः। अन्यपरं व्यंग्यनिष्ठं। एष च कोऽप्यलक्ष्यक्रमव्यंग्यो ल
क्ष्यव्यंग्यक्रमः परः। अलक्ष्येति। न खलु विभावानुभावव्यभिचारिण एव रसः। अपि २३
तु रसस्तैः। इत्यस्ति क्रमः स तु न लक्ष्यते। तत्र रसभावतदाभासभावशान्त्यादिरक्रमः।
भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः॥२६॥ आदिग्रहणाद्भावोदयभावसं

दि: वत्र

का॰प्र॰ विभावाद्यभावात्। प्रधानतया यत्र स्थितो रसादिस्तत्रालंकार्यः। यथोदाहृतं प्राक्।
११ अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेयऊर्जस्वि र
ऊर्जस्विसमाहितादयोऽलंकाराः ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते। तत्र
रसस्वरूपमाह॥ कारणान्यथ कार्याणि सहकारीणि यानि च रत्यादेः स्थायिनो लो
केतानि चेन्नाट्यकाव्ययोः विभावा अनुभावास्तत्कथ्यन्ते व्य
भिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः। उक्तं हि भरतेन॥ विभावानु रस॰ ४
ाव व्य भिचारिसंयोगाद्रसनिष्पत्तिरिति एतद्विवृणुते॥ विभावैर्ललनोद्यानादिभि
रालंबनोद्दीपनकारणैः रत्यादिको भावो जनितः। अनुभावैः कटाक्षभु राम॰
जाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः। व्यभिचारिभिर्निर्वेदादिभिः सहकारि ११

कृतः ८ च४ ल२

निरूपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसंधानान्नर्तकेऽपि प्रतीयमा
नो रस इति भट्टलोल्लटप्रभृतयः। राम एवायमयमेव राम इति न रामोऽयमित्यौ
त्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा न वायमिति रामसदृशोऽयमि
ति सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्याये
प्रतिपत्त्या ५ न रामोऽयमिति प्रतीत्या ग्राह्ये नटे सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरश
लाकिका दृशोः। मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गतेति
दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च॥ अविरलविलोलजलदः कालः
समुपागतश्चायमित्यादिकाव्यानुसंधानबलाच्छिक्षाभ्यासनिर्वर्तितस्वका
र्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारि

का॰प्र॰ निःक्कन्त्रिभैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगादन्यगम
कभावरूपात्तु मीयमानोपि वस्तुसौंदर्यबलाद्रसनीयत्वेनान्यानुमीयमान
१२ विलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां
वासनया [redacted] चर्व्यमाणो रस इति श्रीशंकुकः। न ताटस्थ्येन नात्मगतत्वेन रसः प्र
तीयते नोत्पद्यते नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसा कप
धारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्वोद्रेकप्रकाशानंदम भावो४
यसंविद्विश्रांतिसतत्वेन भोगेन भुज्यत इति भट्टनायकः। लोके प्रमदादिभिः कारणा
दिभिः स्थाय्यनुमानेभ्यासपाटववतां काव्ये नाट्ये चतैरेव कारणत्वादिपरिहारेण रम
विभावनादिव्यापारवत्वादलौकिकविभावादिशब्दव्यवहार्यैः ममैवैते शत्रोरे १२

वैते तटस्थस्यैवैते न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति संबंधिविशेषस्वीकारप
रिहारनियमानवसायात्साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मक
तया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोपि साधारणोपायबलात्त
त्कालविगलितपरिमितप्रमातृतावशोन्मिषितवेद्यांतरसंपर्कशून्यापरिमितभा
वेपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पा+ नप्रमा
स४ त्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नो+ नकरसन्यायेन च
र्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वांगीणमिवालिंगन्नन्यत्सर्वमि
व तिरोदधद्ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारी शृंगारादिको रसः। कारी२
स च न कार्यो विभावादिनाशेपि तस्य संभवप्रसंगात्। नापि ज्ञाप्यः। सिद्धस्य तस्या

का॰प्रा॰ भावात्। अपितु विभावादिभिर्व्यंजितश्चर्वणीयः। कारकज्ञापकाभ्यामन्यत् क्व दृष्ट
१३ मिति चेत् न क्वचिद्दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणं। चर्वणानिष्प
त्त्या तस्य निष्पत्तिरुपचरितेति कार्योप्युच्यतां। लौकिकप्रत्यक्षादिप्रमाणता
परि॰४ टस्थावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितप
रिमितेतरयोगिसंवेदनाविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोप्य
भिधीयतां। तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शनप्रधानत्वात्। नापि वि न४स४
कल्पकं चर्व्यमाणस्यालौकिकानंदमयस्य स्वसंवेदनसिद्धत्वात्। उभयाभावस्व राम॰
रूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधं इति श्री १३
मदाचार्याभिनवगुप्तपादाः॥ ४॥ व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणां

अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः। चिंतादयो व्यभिचारि
णः शृंगारस्येव वीरकरुणभयानकानां इति पृथगनैकांतिकत्वात् सूत्रे मिलिता
निर्दिष्टाः। विपदलिमलिनांबुरुगर्भगेहे मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणि
रभिनवांकुरांकटंका प्रणतिपरे दयिते प्रसीद मुग्धे। इमा क्षौ। परिमृदितमृणालीम्ला
नमंगं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु। कलयति च हिमांशौ निष्क
लंकस्य लक्ष्मीमभिनवकरिदंतच्छेदपांडुः कपोलः। दूरादुत्सुकमागते विचलितं सं इत्यादौ४
भाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किंचांचितभ्रूलतं। मानिन्या
व्यति२ श्चरणानतिव्यतिकरे बाष्पांबुपूर्णेक्षणं चक्षुर्जातमहो प्रपंचचतुरं जातागसि प्रेय
सि। इत्यादौ च यद्यपि विभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां च व्य

न्निचारिणां केवलानामेवास्तिरप्यतिस्तथाप्येतेषामसाधारणमित्यतन्यमद्यपास्येप
का·प्रा· कैपकत्वे सति नानैकांतिकत्वमिति तद्विशेषानाह। शृंगारहास्यकरुणरौद्रवीरभ
१४ च२ यानकाः। बीभत्साद्भुतसंज्ञौ त्यष्टौ नाट्ये रसाः स्मृताः। तत्र शृंगारस्य द्वौ भेदौ। संभोगो
विप्रलंभश्चेति तत्राद्यः परस्परावलोकनालिंगनपानपरिचुंबनाद्यनंतभेदत्वादपरि ४२४
छेद्य इत्येक एव गण्यते यथा। शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं। विस्रब्धं परिचुंब्य जातपुलका
मालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता। तथा। त्वंमु
ग्धाक्षि विनैव कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे रा·म·
तद्वीटिकासंस्पृशि। शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातः श १४

नैकैरलीकवचनोपन्यासमालीजनः। अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहे
च२ तुक इति पंचविधः। क्रमेणोदाहरणानि। प्रेमार्द्रैः प्रणयस्पृशः परिचयादुद्गा
स्ता२ ढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि। यास्वंतःकरणस्य बा
ह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः
।। अन्यत्र व्रजतीति का खलु कथा नाथस्य तादृक्सुहृद्यो मां नेक्षति नागतं ... स्मर
कोपं विधेः प्रक्रमः। इत्यल्पेतरकल्पनाकवलितस्वांता निशांतांतरे बाला वृत्तवि
वर्तनव्यतिकरा नाप्नोति निद्रां निशि।। एषा विरहोत्कंठिता सापत्नः प्रथमापराधस
मये सख्योपदेशं विना नो जानाति सविभ्रमांगवलनावक्रोक्तिसंसूचनं।। स्वच्छैरु च२
च्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलै
लै

का.प्रा.
१५

एभ्रूनिः॥ प्रस्थानं वलयैः सह प्रियसखैरस्त्रैरजस्रं गतं धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः॥ यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित
प्रिय सुहृत्सार्थः किमुत्सृज्यते॥ त्वां मालिख्य प्रणयकुपितां धातुरागैः शिलायाम्
आत्मानं ते चरणपतितं पाव दिच्छामि कर्तुं॥ अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्य
४ ते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतांतः॥ हा स्वामी हा नाकमेरोर्दाहरणानि।
आकुंच्यपाणिमशुचिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं पृषतैः पवित्रे।तारस्वर
प्रथितथूत्कमदात्प्रहारं हाहा हतोऽहमिति रोदिति विष्णुशर्मा॥ हा मातः स्वरिता सि कु
त्र किमिदं हा देवताः क्वाशिषो धिक् प्राणान्पतितोऽशनिर्हुतवहस्तेंऽगेषु दग्धे दृशौ
इत्थं घर्घरमध्यरुद्धकरुणाः पौरांगनानां गिरश्चित्रस्थानपि रोदयंति शतधा कु
राम.
१५

२१

र्वंति भित्तीरपि॥ कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ४२
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं॥ सुद्रा
त्रास मेते विजहिहि हरयो भिन्नशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति परममी सायका निष्प
तंतः॥ सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभंगलीलानियमितजल
धिं राममन्वेषयामि॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शर
पतनभयाद्भूयसा पूर्वकायं॥ दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्ये
दग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ उत्कंपितोत्कंपितं प्रथममथ पश्चात्स्पृष्टपश्चात्स्पृष्टया ल्ल४२
[illegible]
सिप्रां साचेमस्फिकपृष्ठनं धाघवयवस्तुलभान्युग्रप्रतीनि प्रस्त्वा॥ आर्तैः पर्यस्तनेत्रैः प्रकटी [illegible]
ने त्र =२
कृतदशनैः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्य[illegible]मव्यग्रमत्ति
३४

का॰प्र॰ १६ ।चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगिः॥ लोकोत्तरं धैर्यमहो प्रभावः काप्याकृ
तिर्नूतन एष सर्गः॥ एषां स्थायिभावा नाह॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॥ जु
गुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः॥ व्यभिचारिणो ब्रूते॥ निर्वेदग्लानिशंका
ख्यास्तथासूया मदश्रमाः॥ आलस्यं चैव दैन्यं च चिंता मोहः स्मृतिर्धृतिः॥ व्रीडा चपलता ह
र्ष आवेगो जडता तथा॥ गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥ सुप्तं विबोधोमर्षश्चा
प्यवहित्थमथोग्रता॥ मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥ त्रासश्चैव वितर्कश्च वि
ज्ञेया व्यभिचारिणः॥ त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥ निर्वेदस्यामंगलप्रा
यस्य प्रथममनुपादेयत्वेप्युपादानं व्यभिचारित्वेपि स्थायित्वाभिधानार्थं तेन निर्वेदस्था
यिभावो शांतोपि नवमो रसः॥ यथा॥ अहौ वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा राम॰ १६
श्लो॰ २

लोष्टे वा बलवति रिपौ वा सुहृदि वा त्रणो वा स्त्रैणे वा मम समदृशो यांति दिवसाः क्वचित्पु
ण्येऽरण्ये शिवशिवशिवेति प्रलपतः॥ रतिर्देवादिविषया व्यभिचारी तथांजितः॥ भावः प्रोक्तः
आदिग्रहणान्मुनिनृपगुरुपुत्रादिविषया। कांताविषया तु व्यक्ता शृंगारः। उदाहरणं निकं ६३
ठकोणविनिविष्टमीशाते कालकूटमपि मे महामृतं॥ अप्युपात्तमभृतं भवद्वपुर्भेदवृत्तिय
दि मे न रोचते॥ हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः॥ शरीरभाजां भव
दीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यतां॥ एह्येहि वत्स रघुनंदन पूर्णचंद्र चुंबामि मूर्द्ध
नि चिराय परिष्वजे त्वां॥ आरोप्य वा हृदि दिवानिशमुद्वहामि वंदेथवा चरणपुष्करकद्वयं ते॥
एवमन्यदुदाहार्यं॥ अंजितस्त्व्यभिचारी यथा॥ जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा
मया मा मा मां संस्पृश पाणिनेति रुदती गंतुं प्रवृत्ता ततः॥ नो यावत्परिरभ्य चाटुकशतैराश्वास

का॰प्र॰ ७

यदि प्रियां ध्यातस्तावद्दृढं शठेन विधिना निद्रा दरिद्रीकृतः ॥ अत्र विधिं प्रत्यसूया ॥ त
दाभासा अनौचित्यप्रवर्तिताः ॥ तदाभासा रसाभासा भावाभासाश्च । तत्र रसाभासो यथा
स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे विलेभे कः प्राणान् रणमखमुखे यं मृग
से ॥ सुलग्ने को जातः शशिमुखि यमालिंगसि बलात्तपःश्रीः कस्यैषा मदननगरि ध्या
यसि तु यं ॥ अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुचितं बहुव्यापारो
पादानं व्यनक्ति । भावाभासो यथा राकासुधाकरमुखी कमलायताक्षी सस्मेरयौवनतरंगि
तविभ्रमांगी । तत् किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इहाभ्युपायः ।
अत्र चिंता नौचित्यप्रवर्तिता ॥ एवमन्यदुदाहार्यं ॥ भावस्य शांतिरुदयः संधिः शबल ॥ राम॰ ७
ता यथा ॥ क्रमेणोदाहरणं तस्याः सांद्रविलेपनस्तनयुगप्रश्लेषमुद्रांकितं किं वक्ष

त्रि२

सुदी १

श्चरणानतिव्यतिकरव्याजेन गोपाय्यते ॥ इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया साश्लि
ष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतं ॥ अत्र कोपस्य ॥ एकस्मिन् शयने विपक्षरमणी
नामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि कुर्वन्नपि ॥ आवेगादवधीरितः
प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्मा भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः ॥ अत्रौत्सु
क्यस्य ॥ उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फाल
श्च मां कर्षतः ॥ वैदेहीपरिरंभ एष च मुहुश्चैतन्यमामीलयन्नानंदी हरिचंदनेंदुशिशिरस्नि
ग्धो रुणद्ध्यन्यतः ॥ अत्रावेगहर्षयोः ॥ क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषा
णां प्रशमाय नः श्रुतमहो कोपेऽपि कांतं मुखं । किं वक्ष्यंत्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दु
र्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥ अत्र वितर्कौत्सुक्यमतिस्मृ

का॰प्र॰ रणाङ्गं कांतैन्यदन्ति चिंतानां । नावशिष्टेति श्रीकाउदाहृतावोमुरवेर से पितें गिलंग्राप्रुवे
१८ ति कदाचनांते भावाशिष्टे त्रिशांत्यादय । अत्र गिलेराजानुगत विवाहप्रवृत्त नृपसवत् । अनुस्वाना
न संलक्ष्यक्रमव्यंग्य इति स्तु यः । शब्दार्थो भयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः । शब्दशक्ति
मूलानुरणनरूपव्यंग्योऽर्थशक्तिमूलानुरणनरूपव्यंग्यः उभयशक्तिमूलानुरणनरूपव्यं
अ५ ग्यश्चेति त्रिविधः ॥ तत्रालंकारो थवस्त्वेवशब्दाद्यत्राव भा[redacted]सते प्रधानत्वेन स ज्ञेयः शब्द
नयुद्भवो द्विधा । वस्त्वेवेति अनलंकारं[redacted]स्तुमात्रं अद्योयथा । उल्लास्य कालकरवालम
हांबुवाहं देवेन येन जरठोर्जितगर्जितेन । निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रि
जगति ज्वलितः प्रतापः । अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वं माप्रसांक्षीदित्यप्राक राम
रणिकप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्युपमालंकारो व्यंग्यः । ति १८

गमरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः । मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणी
र्विनाति नवृत्त । अत्रैकैकपदस्य द्विपदत्वे विरोधाभासः अभिन्नः सभिन्नः प्राप्ते रुक्मैषे ह्यवदप्रभो
अह्नितः सहितः साधुयशो भिरसतामसि ॥ अत्रापि विरोधाभासः । निरुपादानसंभारमभित्ता
वेव तन्वते । जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥ अत्र व्यतिरेकः । अलंकार्यस्यापि ब्राह्म
णश्रमणन्यायेनालंकारता । वस्तुमात्रं यथा । पंथिअ ण एत्य सत्थरमत्थि मणं पत्थरत्थले गामे ॥
उण्णअपओहरं पेक्खिऊण जइ वससि ता वससु । अत्र यद्युपभोगक्षमोऽसि तदास्वेति व्यज्यते ।
शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेंद्र यस्मै त्वं । यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥ अ
त्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते । अर्थशक्त्युद्भवेऽप्यर्थो
व्यंजकः संभवी स्वतः । प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य च ॥ वस्तुवालंकृतिर्वेति षड्

का॰प्र॰ द्भेदोऽसौ व्यनक्ति यत्। वस्त्वलंकारमथवा तेनासौ द्वादशात्मकः॥ अर्थो द्विविधः स्वतःसंभ
१९ वी इदंप्रथमकल्पितश्चान्त्यः स्वतःसंभवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचि
त्येन संभाव्यमानः कविना प्रतिभानमात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति
द्विविधोऽपर इति त्रिविधः। वस्तु वालंकारो वासाविति षोढा व्यञ्जकः। तस्य वस्तु वालंकारो वा का॰
व्यङ्ग्य इति द्वादशभेदोऽर्थशक्तिमूलो ध्वनिः। क्रमेणोदाहरणानि। अलससिरोमणि धुत्ताणं
अग्गिमो पुत्ति धणसमिद्धिमओ। इय भणिएण णअंगी पप्फुल्लविलोअणा जाआ॥ अ
त्र ममैवोपभोग्य इति वस्तुना वस्तु ध्वन्यते। धन्यासि या कथयसि प्रियसंगमेऽपि विश्रब्ध
चाटुकशतानि रतान्तरेषु। नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिद राम
पि स्मरामि॥ अत्र त्वमधन्या अहं तु धन्येति व्यतिरेकालंकारः। दर्पान्धगन्धगजकुंभक १९

पाटकूटसंक्रान्तिनिघ्न[illegible]घनशोणितशोणशोचिः। वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः॥ अत्रोपमालंकारेण सकलरिपुबलक्षयः क्षणात्करि
ष्यत इति वस्तु। गाढकान्तदशनक्षतव्यथासंकटादरिवधूजनस्य यः। ओष्ठविद्रुमदलान्यमो
चयन्निर्दशन्युधि रुषा निजाधरं॥ अत्र विरोधालंकारेण अधरनिर्दशनसमकालमेव श राम ४
त्रवो व्यापादिता इति तुल्ययोगिता। ममक्षत्याप्यन्यस्य क्षतिर्निवर्त्यतामिति तद्बुद्धिरुत्प्रेक्ष्यत
इत्युत्प्रेक्षा च। एषूदाहरणेषु स्वतःसंभवी व्यञ्जकः। कैलासस्य प्रथमशिखरे वेणुसंमूर्छना
भिः श्रुत्वा कीर्तिं विबुधरमणीगीयमानां त्वदीयां॥ स्रस्तापाङ्गाः सरसबिसिनीकाण्डसंजातशं
का दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति। अत्र वस्तुना येषामप्यर्थावबोधो नास्ति
तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोति त्वत्कीर्तिरिति वस्तु ध्वन्यते॥ केसेसु बला

का॰प्र॰ णोदिअलेणासमरम्मिजअसिरीणहिआ॥ जह कंदराहि विहुरा तस्स दढं कंठअम्मि संवदि
२० आ॥ अत्र केशग्रहणावलोकनेद्दीपितमदनाइव कंदरास्तद्विधुरान् कंठे गृहीत्वा तिष्ठंतीत्युत्प्रेक्षा
एकत्र संग्रामे विजयदर्शी नाम्नस्यारय: पलाय्य गुहासु तिष्ठंतीति काव्यहेतु:। न पलाय्य गतास्त
द्वैरिणोपि तु नततः पराजवं संभाव्यतान् कंदरा नस्वं तत्तासपक्षतिष्ठ॥ गाढालिंगणरहसुज्जअम्मि अ
घु दइए लहुं समोसरइ माणंसिणीण माणो पीडणभीरुव्व हिअआहि॥ अत्रोत्प्रेक्षयाप्रसालिं वि४
गनादित्तत्र विशेमतइ तिवस्तु॥ जाठेरे वहसंताकाईव अणावुरूढ बद्धविति वेसाद वेइ भुवणा
ध्रुअ मंदुलणगां विअइ सावाराणं॥ अत्रोत्प्रेक्षयाव मलकारकारणांनवे नवंजलजासनस्थो नि राम॰
र्भिंमातइ तिव्यतिरेक:॥ एषु कविप्रौढोक्तिमात्रनिष्पन्न:। जेलंकागिरिमेहलाहिं खलिदा २०
संभोअखिविणोरई फारुफुल्ल[illegible]णावलीकवलणे पत्तादरिद्दत्तणं तेएणिहं मलआ

श्रीदामंजरक अगरत्र

उ२ सुंसा

रिणालाविरहिणीणासासंसंपक्किणो जादा[illegible]त्तिसिसुत्तणोविव हलातारुणं विआ अत्रनि
श्वासै: प्राप्तैश्वर्यै: किं न कुर्वतइति वस्तुना वस्तु व्यज्यते सहि विरइऊण माणस्स मज्झ धीरत्त
णेणआसासं पिअंदंसणविहलं खणखणम्मि सहस्सेत्ति तेणओसरिअं॥ अत्र वस्तुना
अक्षते प्रार्थने प्रसन्नेति विभावना प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढं न शक्यतइत्युत्प्रेक्षा
चाउल्लोल्लकारअरअणखणा तुह लोअणेसु मह दिण्णो। रत्तंसुअपसाओ कोवेण पुणोइ
मे ण अक्कमिआ। अत्र किमिति लोचने कुपिते वहसि सा सुत्रालंकारेण [illegible] न केवलमाईन
खवसता निगोपायसि याबेत्रेवामकेप्रसादपात्रं जातेति वस्तु। महिलासहस्सभरिए तुह हिअए
सुहअ सा अमाअंती। अणुदिणमणण्णकम्मा अंगं तणुअंपि तणुएइ॥ अत्र हेतुलंका
रेण तनोस्तनूकरणोपि तद्हृदये नवर्ततइति विशेषोक्तिः। एषु कविनिबद्धवक्तृप्रौढोक्तिमा

म३ ६चं

का॰प्रा॰ त्रनिष्पन्नशरीरोव्यंजकः। एवं द्वादश भेदाः शब्दार्थोभयमूलकाः। यथा। अतंद्रामरणासमुद्योपि
२१ तमन्नथा। तार कातरताश्या मा सानंदं न करोति किं भेदा अष्टादश। स्पतत्व अ स्पेति ध्वनेः। न
नुरसादीनां बहुभेदत्वे कथमष्टादशेत्याह। रसादीनामनंतत्वाद्भेद एकैकहिगण्यते। अनंतत्वादिति।
तथाहि। नवरसाः। तत्र शृंगारस्य द्वौ भेदौ संयोगो विप्रलंभश्च। संयोगः स्त्रीपुंसयोः परस्परदर्शना
लिंगनपरिचुंबनादि कुसुमोच्चय जलकेलि सूर्यास्तमयचंद्रोदयषडृतुवर्णनादयो बहवो
भेदाः। विप्रलंभस्याभिलाषादयः उक्ताः। तयोरपि विभावानुभावव्यभिचारिवैचित्र्यात् तत्रा
पि नायकयोरुत्तममध्यमाधमप्रकृतित्वात् तत्रापि देशकालावस्थाभेदाः। एकस्यैव रसस्या २२
नंत्यं का गणनात्वन्येषां। असंलक्ष्यक्रमत्वेनु सामान्यमात्रित्य रसादिध्वनिरेक भेद एव ग रा॰मं॰
एयते [redacted]॥ वाक्ये द्व्युत्थः। द्व्युत्य इति शब्दार्थोभयशक्तिमूलः। पदे प्यन्ये। अपि शब्दा २१

द्वाक्ये। एकावयवस्थित्येन भूषणेन कामिनीव पदद्योत्येन व्यंग्येन वाक्यद्योत्यापि भा
रती भासते। तत्र पदप्रकाश्यत्वे क्रमेणोदाहरणानि। यस्य मित्राणि मित्राणि [redacted]णि
शत्रवः शत्रवस्तथा। अनुकंप्योनुकंप्यश्च स जातः स च जीवति। तत्र द्वितीय मित्रादिशब्दा आ
दिथिल श्वस्तत्वनिर्य्यत्रणत्वस्नेहपात्रत्वादि यर्थांतरसंक्रमितवाच्याः। खलववहारादीसंति दा
उह रुणा वितथविचारा णां हि अवश्यसंवद्धा मआणा कुव्वव सा आ वि मुञ्चंति अत्र विमुच्यंता
ति। लावण्यं तत्रद सौ कांतिस्तद्रूपं स वचः क्रमः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्।
अत्र तदा दिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यंते। अथवा। मुग्धे मुग्धतयैव नेतुमखि
लः कालः किमारभ्यते मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि। सख्यैवं प्रति
बोधिता प्रतिवचस्तामाह भीतानना नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति॥ अत्र १

श्री शंस नीचैः …

सुकृता गम्यते। भावादीनां पदप्रकाशपत्लेऽधिकं नवै चित्र्यमिति नत्तं दुदा क्रिय
कप्र २२ तो रुधिरविसरप्रसाधितकरालकरालरुचिरभुजपरिघः। त्रुटितभ्रकुटी विटंकि
तललाटपट्टो विभाति नृपभीमः। अत्र भीषणा। यस्य नाम सेनउपमानां। मुक्तिमुक्ति
कृद्वैकांतसमादेशानतत्परः। कस्य नानंदनिस्पंदं धानि सदागमः। का चित्तं केतदाधि गि२५
नमेवंमुखया हंमाशंसति। सायंस्नानमुपासितमलं जैनांगासमालिंगितं याता रंचि य
लमौलिमंबरमणिर्विस्रंसमत्रागतिः। आश्चर्यं तव सौकुमार्यमभितः क्लांतासि येनाधुना
नेत्रद्वंद्वममीलनव्यतिकरं शक्नोति तेनासितुं। अत्र वस्तुना कृतपरपुरुषपरिचया
ख्याता सा इति वस्तु धुनापरद्योसंव्यज्यते। तदप्राप्ति महादुःखविलीनाशेषपातका राम
न चिंताविपुलाह्लाददत्ती। …पुण्यपचया सती। चिंतयंती जगद्योनिं परब्रह्मस्वरूपि २१

णं। निरुच्छ्वासतया मुक्तिं गता न्या गोपकन्यका। अत्र जन्मसहस्रैरुपभोक्तव्या निदुष्कृत
सुकृतफलानि वियोगदुःखचिंताह्लादाभ्यामनुभूतानामुक्तं। एवं अशेषचयशब्दै
त्यै अतिशयोक्ता। शुद्धदासा वस्त्रदाक्षावनमवनं व्यसनमव्यसनं। बतवीरतव द्विषतां परा
त्सुखेलयिपरा दुःखं सर्वा अत्र शब्दश्रा क्लिष्टलविरोधांगेनार्थांतरन्यासेनविधिरपि
त्वामनुवर्त्तत इति सर्वपदद्योत्यवस्तु… हस्तगोसम्मि आसि अहरो मिलाण
कमलदलोइअ आववकुआ सोऊण कुणाइ वं… महीसमुहं। अत्र रूपके णत्व यास्यमु
७३ ऊर्मुद्रः परिचुंबनं कृतं येन्हा नत्वमिति मिलाणादिपदद्योत्संकाव्यलिंगा। एषु स्वतः सं
भवाव्यंजकः। राई सुचंद धवला सुललिअं अप्पफीलिरू णाजो वावा। एक्कच्छत्तं विअंकु
णइ भुवणरज्जं विअंभंतो। अत्र वस्तुनायेनाकामिनामसौराज्ञास्मरस्त्येभ्योन

कौ. प्रा.
२२ निर

कश्चिद्दर्पितदादेशपराङ्मुखइतिताग्रद्विरूपभोगपरैरेवतेक्लिशातिवाध्यतइति भुवनराज्य
पदयोरेव स्तस्त्रकाश्यते। निशितशरधियार्पयत्यनंगो दृशि सुदृशः स्वबलं वयस्य परा
ले। दृष्टिशिंपतति यत्र सा च तत्र व्यतिकरमेसममुन्निषंष्पवस्थाः। अत्र वस्तुना युगप
दवस्थाः परस्परविरुद्धा अपि प्रभवंतीतिव्यतिकरपदद्योत्यो विरोधः। वारिज्जंतो विपु
णो संद्रावकदथ्थिएण हिअएण थणभरवयस्सएण। विसुद्धजाईण चलइ सेहरो। अत्र
विशुद्धजातित्वलक्षणो न हे हलंकारे णाहारो नवातेके पमानएवा लेइ तिन चलता।
तिपदव्यंग्यं वस्तु। सो मुद्धसामलंगो धम्मिल्लो कलिअललिअनिजदेहो। तएखं
धाण्हिबलंगहिअसरो सुरअसंगरे जयइ। अत्र रूपकेण मुद्धराकर्षणीतथा केशपा
शः स्कंधयोः प्राप्तयथारतिविरतावपि अनिहताभिलाषः कामुको भवतीति स्कंधपदद्यो रा म २२

त्या विभावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः। ण वपुस्सि नाभिअंकस्स सुरअ ओ
तेसि नणसुमहसबंका सोहग्गास मग्गा पउंसए अणिब्भरुहअणा। अत्र वस्तुना भयावाच्य
क२ त्या मपि प्रथममनुरक्तस्त्वं न ततइति न वेसादिपउंसेत्यादिपदद्योत्यं वस्तु व्यज्यते। सहिआ
वणोऊ अणसमरम्मि अंकवालीसहीए निविडाए। हारो णिवारिऊंण च्छिअ उच्छेरंतो तदोद
हरमिअं। अत्र वस्तुना हारच्छेदादनंतरमन्यदेवरतमवश्यमभूत्तत्कथयकीदृशमिति व्यतिरेकः
थपदगम्यः। पविसंती घरवारं विवलिअवअणा पुलोइऊणपहं। खंधाघेनूणघडंहाहाणट्ठो
त्ति रुअसि सहि किं ति। अत्र हे हलेकारेणासंकेतनिकेतनं गच्छेत्तं दृष्ट्वा यदि तत्र गंतु मिच्छसि
तदपरं घटं गृहीत्वा गच्छेति वस्तु किं त्रिपदव्यंग्यं। यथा वा। विहलं खवलं तुमं सहि दट्ठूण कुडे
ण। अत्र नदीकूले लतागहने कृतसंकेतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुन

तरलिता दिट्ठी वारेवंतस्सवि सिरोउण्णाभअणिमा उअइ मिभिलो

का.प्र र्न्दागमनायद्वाराद्घाटनव्याजेनबुद्धिपूर्वंव्याकुलयात्वयाद्वारंस्फोटितमितिमयाचेति
२५ तांतकिमितिनाश्वसिषिताल्समाकृतसिद्धयेव्रज अहंतुतेरवप्रानिकटेसमर्थयिष्ये
इतिद्वारस्पर्शनव्याजेनेत्समपद्कृत्यावस्त्का जोर्हिएमङ्गसेणा आविङ्गलत्तारुद्दरुसुत्र मनीसा
बुद्धा विणावोट्टघंपरवङ्घ आहहहरइतुहहिअं आ अत्रकाव्यलिंगेनशङ्कापरवधूचास्मा
नुज्जितान्जिलषसीति त्वदीयभाववरितंकुनशक्यतस्याक्षेपःपरवधुपदप्रकाश्यः। एसुके २१
विनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः। वाक्यप्रकाश्येतुपूर्वमुदाहृतंतात्राक्षार्थो भय
गात्नुद्वयस्त्कपदप्रकाश्योनभवतीतिपंचत्रिंशाद्भेदाः। प्रबंधेप्यर्थशक्तिमूः। यथागृ
ध्रगोमायुसंवादादौ। तथाच अलंस्थिहाश्मशानेस्मिन्गृध्रगोमायुसंकुलेकंका रा.म. २५
लबहुले घोरेसर्वप्राणिभयंकरे नचेहजीवितःकश्चित्कालधर्ममुपाग
२२
तःप्रियोवाल यदिवाद्विष्यःप्राणिनांगतिरीदृशी॥ इतिदिवाप्रभवतोगृध्रस्यपुरुषवि
सर्जनपरमिदंवाक्यं। आदित्योयंस्थितोमूढाःस्नेहंकुरुतसांप्रतंबहुविघ्नोमुहूर्तोयं
जीवेदपिकदाचन। अमुंकनकवर्णाभंबालमप्राप्तयौवनंगृध्रवाक्यात्कथंमूढास्त्य
४वि जध्वमविशंकिताः इति। निशिविज्ंभमाणस्यगोमायोर्जनव्यावर्तनेननिष्ठंचेतिप्रबंध
एवप्रथते। अन्येत्वेकादशभेदाग्रंथविस्तरभयान्नोदाहृताः। स्वयंलक्ष्यतोनुसर्तव्याः
अपिशब्दात्पदवाक्ययोः। पदैकदेशरचनावर्णेष्वपिरसादयः। तत्रप्रकृत्यायथा। ५२
रङ्केलिहिरिअणिअसणकरकिसलयरुद्धनअणजुअलस्सरुद्दस्सतइअणयनप
घव्पइपरिचंबिअंजयइ। जयतीतिनतुशोभतइत्यादिसमानेपिहिस्यागनव्यापारे
लत्तरेणविव्यापारेणास्यपिधानमितितदेवोत्कर्षंनयत्। प्रेयीन्सायमपाकृतःस

शपथं पाशनतः कांतया द्विश्रापेव पदा निवासभवनाद्यावन्तया सुन्मनागता वत्सतु
का.प्र. पाणिसंपुटलसन्नीवी निवंधं धृतो धाविस्वैवकृतप्रणामकमहो प्रेम्णो विचित्रा गतिः
२५ अत्र पदानीति नतु द्वारणीति कृत्युपोर्यथा । पथिपथि शुकचंचुचारुराभांकुराणां दि रू.२
शि दिशि पवमानो वीरुधां लासकश्च नरिनरि किरति द्राक्कन्दायकानुष्य धन्वा पुरिपु
रि विनिहता मानिनीमानचर्चा । अत्र किरतीति किरणस्य साक्ष्यमानत्वं निहतेति
निवर्तनस्य सिद्धत्वेति सुपाचत्वापि क्लप्रसयेनाक्तात त्वेद्योमनो । यथा वा । लिखन्ना
स्ते भूमिं बहिरवनतः प्राणदयितो निराहाराः सख्यः सततरुदितोच्छूननयनाः । परित्य
क्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना ॥ अत्र [illegible]
लिखतीत्यपि तु प्रसादपर्यंतमास्त इति । तथा आस्त इति नत्वा सितइति भूमिमिति नतु २५

न्नूमाविति । नतु बुद्धिपूर्वकं किंचिल्लिखतीति क्षुद्विभक्तीनां व्यंजकत्वं । संबंधस्य यथा । गा
मारुह्य निगमेव सामितत्र अरविंदस्य आगमि [illegible] अरिकृत्वा पदोलो हते भियाहो भि
साहोर्मि अत्र ना [illegible] क्रिया तिथि [illegible] रमणीयं [illegible] कुमार [illegible] दिति कालस्य
एषा नमन्महेश्वरकार्मुकं दाशरथिं प्रतिकुपितस्य भार्गवस्योक्तिः । वचनस्य यथा ॥
ताणगुणगहणाणं ताणुकंठाणतस्स पेमस्स ताण भणिति आणसुंदरइरिस अंजाय
मवसाणं । अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योतयतो पुरुषव्यत्ययस्य यथा ॥
रे रे चंचललोचनांचितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं महिमानमेणनयनामालोक्य किंर
त्यसि । किं मन्ये विहरिष्यसे बत हतां मुंचांतराशामिमामेषा कंठतटे कृता खलु शिला संसारवा
रां निधौ । अत्र हा सं [illegible] निपातस्य यथा । येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि प्राय

का॰प्र॰
२६

उ ८२

केवलनीतिशरणैः कार्यं किमुर्वीश्वरैः। येनस्माद्यक्रमेण पराक्रमनयस्वीकान्तक्रमास्तेस्तु
नैवमवादृशा विजगति द्वित्राः पवित्राः परा। अत्र पराक्रमस्य प्राधान्यं गम्यते। विभक्ति
विशेषस्य यथा। प्रधनाध्वनि धीरधनुर्ध्वनिभृति विधुरैरयोधि तव दिवसं। दिवसेन
तु नरप भवद्युद्धविधिसिद्धसाधुवादपदं। अत्र दिवसेनेसप वर्गेत्तती याफलप्राप्तिं द्योत
यति। भूयः सं विधनगरारण्यपर्यटनं हृष्ट्वा दृष्ट्वा भवनवलभीतुंगवातायनस्था। सा
क्षात्काममनंगवामिव रतिर्मालतीमाधवं यद्गाढोत्कंठालुलितललितैरंगकैस्ताम्यतीति। अ
त्रानुकंपावृत्तेः करूपं नु भवपदं योनगतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो वि
कारः कोप्यंतर्जडयति च तापं च कुरुते। अत्र प्रशब्दस्योपसर्गस्योत्कृतं च गर्वो। भिनु राम॰
खं मनरुच या किमन्यदेवं निहतास्वनो द्विषः तमां सितिष्टेतिहिताबहुंसुमानन्त २६

तद्धितस्य परिच्छेदातीतः सवृत्तरवचनानामविषये पुनर्जन्मन्यस्मिन्नृर

पावदायात्पुर्दर्पडिभोलितां। अत्र तुल्ययोगितायोतकस्य च इति निपातस्योरामे
सौभुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदिपरं देवो न जानाति
तं बंदीवैष यशांसि गायति मरुधस्येक बाणाहतिश्रेणी■भूतविशालतालविवरो
द्गीर्णैः स्वरैः सप्तभिः। अत्रअसावितिभुवनेष्विति गुणैरिति सर्वनामप्रातिपदिकवच
नानां नत्वादिति नमदितिअपि तत्स्वादिस्यस्य सर्वादेः पिरणाः। भाग्यविपर्ययादिति अ
न्यथा संपत्ति मुखेन नत्वभावमुखेनाभिधानस्य। तरुणिमनि कृतावलंबने
नुमदनधनुर्धेर्वोः पठत्यग्रेअधिवसतिसकलललनामौलिमियं च किंतह रिणा
चलनयना। अत्र इमनिजव्ययीभाववकर्मभूताधाराणां स्वरूपस्य। तरुणावेइति
धतषः समीपइति मौलौवसतास्यत्रर्थादिभिःतुल्येए षां वाचकत्वेऽस्तिकथंचित्

का॰प्र॰ २१

रूपस्य विशेषोयश्चमत्कारकारी स एव व्यंजकः एवमन्येषामपि बोद्धव्यं वर्णरचनानां व्यं
जकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते अपि शब्दात्प्रबंधेषु नाटकादिषु एवं रसादीनां पू
र्वगणितभेदाभ्यां सह षड्भेदाः भेदास्तदेकपंचाशत् व्याख्याताः तेषां चान्योन्ययोजने संकरेण
त्रिरूपेण संसृष्ट्या चैकरूपया ॥४३॥ न केवलं शुद्धा एवैकपंचाशद्भेदा भवंति यावत्तेषां स्व
प्रभेदैरेकपंचाशता संशयास्पदत्वेनानुग्राह्यानुग्राहकत्वेनैकव्यंजकानुप्रवेशेन चेति त्रिवि
धेन संकरेण परस्परनिरपेक्षस्वरूपयैकरूपया संसृष्ट्या चेति चतुर्गुणने वेदखाब्धिवि
यच्चंद्राः १०४०४ शुद्धभेदैः सह शरेषुयुगखेंदवः १०४५५ तत्र दिङ्मात्रमुदाह्रियते खणपा
हुणिआ देअर जाआए सुहअ किंपि दे भणिआ। रुअइ पडोहरवलहीघरम्मि अणुणिज्ज राम॰
उ वराई। अत्रानुनयः किं तूपभोगलक्षणेर्थांतरे संक्रमितः किमनुरणनन्य २१

येनोपभोग एव व्यंग्योपि व्यंजक इति संदेहः ॥ स्निग्धश्यामलकांतिलिप्तवियतो वेल्लद्बलाका
घना वाताः शीकरिणः पयोदसुहृदामानंदकेकाः कलाः। कामं संतु दृढं कठोरहृदयो रामो
स्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव। अत्र लिप्तेति पयोदसुहृदामि
ति चात्यंततिरस्कृतवाच्ययोः संसृष्टिस्ताभ्यां सह रामोस्मीत्यर्थांतरसंक्रमितवाच्यस्या
नुग्राह्यानुग्राहकभावेन रामपदलक्षणैकव्यंजकानुप्रवेशेन चार्थांतरसंक्रमितंच्य वा॰
रसध्वन्योः संकरः ॥ एवमन्यदप्युदाहार्यं ॥ ॥ इति काव्यप्रकाशे ध्वनिनिर्णयो नाम
चतुर्थ उल्लासः ॥ ॥ एवं ध्वनौ निर्णीते गुणीभूतव्यंग्यस्य प्रभेदानाह। अगूढमपरस्यां
गं वाच्यसिद्ध्यंगमस्फुटं संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंदरं ॥४५॥ व्यंग्यमेवं
गुणीभूतव्यंग्यस्याष्टौ भिदा मताः कामिनीकुचकलशवद्गूढं चमत्कारोति। अगूढं तु

का.प्र. रतयावाच्यायमानमितिगुणीभूतव्यंग्यमेव। अगूढं यथा। यस्यासुहृत्कृततिरस्कृतिरे
२८ स्पष्टहस्तसूचीव्यधव्यतिकरेणयुनक्ति कर्णौ कांडगुणाग्रघनभाजन मेषसोस्मिजी
वन्नसंप्रतिभवाग्निकिमावहामि। अत्रजीवन्नित्यर्थांतरसंक्रमितवाच्यस्य गुणीकृतको
कनदरेणुपिशंगितांगागायंतिमंजुमधुपाग्रहदीर्घिकासु। एतच्चकास्तिचरवेर्नवबंधु
जीवपुष्पच्छदाभमुदयाचलचुंबिबिंब। अत्रचुंबनस्यात्यंततिरस्कृतवाच्यस्य। अत्रासो
४२ त्कर्णपांबधनविधिःश्लक्ष्णमवद्वैरेणगाढंवर्त्मसिर्त्नदितेहनुमतात्रोणाद्रिरत्राहृतः। दि
व्यैरिंदुजिदत्रलक्ष्मणशरैर्लोकांतरंप्रापितः केनाप्यत्रमृगाक्षिराक्षसपतेर्कृत्ताचकंठा राम
टवी। अत्रकेनाप्यत्रेत्यर्थशक्तिमूलानुस्वानरूपस्य। तस्याप्यंत्रेतियुक्तः। अपरस्य
रसादेर्वाच्यस्यवाक्यार्थीभूतस्यांगंरसादिअनुरणनरूपंवा। अयंसरसनोत्कर्षीपी २८

नस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरः। अत्रशृंगारःकरुणस्य। कैला
सालयभाललोचनरुचानिर्वर्तितालक्तकव्यक्तिःपादनखद्युतिर्गिरिभुवःसावःसदात्रा
यतां। स्पर्द्धाबंधसमृद्धयेवसुदृढंरूढाययानेत्रयोःकांतिःकोकनदानुकारसरसास
घःसमुत्सार्यते। अत्रभावस्यरसः। अत्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथांभो
धयःस्तानेतानपिबिभ्रतीकिमपिनक्लांतासितुभ्यंनमः। आश्चर्येणमुहुर्मुहुः
स्तुतिमितिप्रस्तौमियावद्भुवस्तावद्बिभ्रदिमांस्मृतस्तवभुजोवाचस्ततोमुद्रि
ताः। अत्रभूविषयरत्याख्यो भावोराजविषयभावस्यांगं। बंदीकृत्यनृपद्विषांमृ
गदृशस्ताःपश्यतांप्रेयसांश्लिष्यंतिप्रणमंतिलांतिपरितश्चुंबंतितेसैनिकाः। अ
स्माकंसुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधेविध्वस्ताविपदोखिलास्त

का॰प्र॰ २८

तैःप्राप्तर्धिभिःस्तनपसा।अत्र भावस्य सा मासभावान्नासौ प्रथमद्वितीयार्द्धयोर्लो।अ
विरलकरवालकंपनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः॥ददृशे तव वैरिणां मदः स गतः क्वापि
तवेक्षणे क्षणात्॥अत्र भावस्य प्रशमः॥साकं कुरंगकदृशा मधुपानलीलाः कर्तुं सुहृद्भि
रपि वैरिणि ते प्रवृत्ते।अन्याभिधायि तव नाम विभो गृहीतं केनापि तत्र विषमामकरोद
वस्थां॥अत्र त्रासस्योदयः।असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभे
ष्वथ च रसिकः शैलदुहितुः॥प्रमोदं वो दिश्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां यु
गपदभियुक्तः स्मरहरः।अत्रावेगधैर्ययोः संधिः।पश्येत्कश्चिच्चल चपल रे का त्वराहं कु
क्वचित्प्रयोगः कार्य इति न युक्तं मुक्ता। युक्तैव। चरणत्रपरित्राणरहिताभ्यामपि द्रुतं पा-
दाभ्यां दूरमध्वानं व्रजन्नपि न खिद्यते इत्युदाहार्यं। ख्यातेऽर्थे निर्हेतोरदुष्टता। यथा। चं-
द्रंगता पद्मगुणान्न भुंक्ते पद्माश्रिता चांद्रमसीमभिख्यां। उमामुखं तु प्रतिपद्य लोला
धांर द्विसंश्रयां प्रीतिमवाप लक्ष्मीः। अत्र रात्रौ पद्मस्य संकोचो दिवा चंद्रमसश्च निःप्रभत्वं लो-
कप्रसिद्धमिति न भुंक्ते इति हेतुर्नापेक्षितो। अनुकरणे तु सर्वेषां। श्रुतिकटुप्रभृतीनां दोषा-

का.प्र. ५८

णांनदुष्टत्वं। यथा। मृगचक्षुषमद्राक्षमित्यादि कथयत्ययं। पश्यैष च गवित्याह सुत्रामाणं य
जेति च॥ वक्त्राद्यौचित्यवशाद्दोषोपि गुणः क्वचित्क्वचिन्नोभौ। वक्तृप्रतिपाद्यव्यंग्यवाच्यप्रकरणा
दीनां महिम्ना दोषोपि क्वचित् गुणः क्वचिन्न दोषो न गुणः। तत्र वैयाकरणादौ वक्तरि प्रति
पाद्ये वा रौद्रादौ च रसे व्यंग्ये कष्टत्वं गुणः। क्रमेणोदाहरणानि। दीधीङ्वेवीङ्समः कश्चिद्गुणवृद्ध्यो दीधीङ्वेवीङ्
र्भाजनं। क्विप्प्रत्ययनिभः कश्चिद्यत्र संनिहिते न ते॥ यदा त्वामहमद्राक्षं पदविद्याविशारदं।
उपाध्यायं ततोस्मार्षं समस्प्राक्षं च संमदं॥ अत्र प्रोतद्बृहत्कपालनलककूरक्वणत्कंकणप्रा
यप्रेंखितभूरिभूषणरवैराघोषयन्नंबरं पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्व्या
लोलस्तनभारभैरववपुर्दर्पोद्धतं धावति॥ वाच्यवशाद्यथा। मातंगाः किमु वल्गितैः किमफ
लैराडंबरैर्जंबुकाः सारंगा महिषा मदं व्रजत किं शून्येषु शूरा न के। कोपाटोपसमुद्भटोत्क एम ५९

शि किं वाताभिधूतं शिरः उत्कंठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाह

टसटाकोटेरिभारेः पुरः सिंधुध्वानिनि हुंकृते स्फुरति यत्तद्गर्जितं गर्जितं॥ अत्र सिंहे वाच्ये परुषा
शब्दाः। प्रकरणवशाद्यथा। रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनं नो दृष्टेति मुधैव
चालय हतिमंतरेण भवतः पुष्पोद्गमोयं कुतः॥ अत्र शिरोविधूनने न कुपितस्य वचसि।
क्वचिन्नीरसे न गुणो न दोषः। यथा। शीर्णघ्राणांघ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्त
घोषान्दीर्घाघ्रातानघौघैः पुनरपि घटयत्येक उल्लाघयन्यः॥ घर्मांशोस्तस्य वोंतर्द्विगुण
घनघृणानिघ्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातं॥ अ
प्रयुक्तनिहतार्थौ श्लेषादावदुष्टौ। यथा। येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृ
तो यश्चोद्वृत्तभुजंगहारवलयो गंगां च योधारयत्। यस्याहुः शशिमच्छिरोहर इति स्तु
त्यं च नामामराः पायात्स स्वयमंधकक्षयकरस्त्वां सर्वदो माधवः॥ अत्र माधवपक्षे शशिम

२१

का.प्र. दंधुकट्यकरशद्बावप्रयुक्तनिहतार्थौ। अश्लीलं क्वचिद्गुणो यथा। सुरतारंभगोष्ठ्यां तां बलदृ
६० नविधिना विसृजेद्वयस्यौ द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु इति कामशास्त्रस्थितौ करिहस्ते
न संबाधे प्रविश्यान्तर्विलोडिते। उपसर्पन् ध्वजः पुंसां साधनान्तर्विराजते। रामकथासु उत्त
मेथ नीच्छूनमंडूकम्याटितोदरसन्निक्रिं दिनिस्त्रीव्रणो शक्तिमेः कस्य जायते। निर्वाणवैरदहनाः उत्तर४
प्रशमादराणां नंदंतु पाडुतनयाः सह माधवेन। रक्तप्रसाधितभुवः [illegible]त विग्रहाश्च स्वस्था ह५
भवंतु कुरुराजसुताः सभृत्याः। अत्र भाव्यमंगलसूचकं। संदिग्धमपि वाच्यमहिमाक्वचिन्नि
यतार्थप्रतीति[illegible]न्नि[illegible]व्याजस्तुतिपर्यवसायित्वे गुणो यथा। पृथुकार्तस्वरपात्रं भू
व२ षितनिःशेषपरिजनं देव। विलसत्करेणुगहनं संप्रति सममावयोः सदनं। प्रतिपाद्यप्रति
पादकयोर्ज्ञत्वे सत्यप्रतीतो गुणः। यथा। आत्मारामा विहितरतयो निर्विकल्पे समाधौ राम
६०

ज्ञानोत्सेकाद्विघटिततमोग्रंथयः सत्वनिष्ठाः। यं वीक्षंते कमपि तमसां ज्योतिषां वा परस्तात्तं मो
हांधः कथमयममुं वेत्ति देवं पुराणां। स्वयं वा परामर्शे यथा। षडधिकदशनाडीचक्रमध्यस्थि
तात्मा हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः। अविचलितमनोभिः साधकैर्मृग्यमाणः स ज
यति परिणद्धः शक्तिभिः शक्तिनाथः। अधमप्रकृत्युक्तिषु ग्राम्यो गुणः। यथा। फुल्लुक्करं कल
मकूरसमं वहंति जे सिंदुवारविडआ मह[illegible]हाते। जे गालिदस्स महिसीदहिणो सरिस्सा ते किंच
मुद्धविअइल्लपसूणपुंजा। अत्र कलम[illegible]क्तमहिषीदधिशब्दा ग्राम्या अपि विदूषकोक्तौ न्यू
नंपदं क्वचिद्गुणो यथा। गाढालिंगनवामनीकृतकुचप्रोद्भूतरोमोद्गमा सांद्रस्नेहरसातिरेकविगल
व२ च्छ्रीमन्नितंबांबरा। मा मा मानद माति मा [redacted] मलमिति क्षामाक्षरोल्लापिनी सुप्ता किन्नु मृता नु किं
मनसि मे लीना विलीना नु किं। क्वचिन्न गुणो न दोषः। यथा। तिष्ठेत्कोपवशात्प्रभावपिहिता दी

कप्र. धनं साकुप्यति स्वर्गायोत्पतिता मवित्मपि पुनर्नीवा[illegible]ईमस्या मनः नाहन्तुं विबुध्य द्विषोपि न
६१ वमे शङ्काः पुरोवर्त्तिना संचाल्यं तम गोचरं नयनयोर्यातेति कोयं विधिः। अत्र पिहितत्प[illegible]नंतरं नै
३२ तद्यते यैतैर्न्यूनैः पदैर्विशेषबुद्धेरकरणान्नगुणः। उत्तरप्रतिपत्तिः पूर्वा प्रतिपत्तिं बाधतइति नदो
षः। अ्र अधिकं पदं दुष्टं यथा। यद्वंचनाहितमतिर्बहु चाटुगर्भं कार्योन्मुखः खलजनः कृतकं ब्र
वीति। तत्सर्थं धवोनन विदंति विदंति किंतु कर्तुंह थाप्रणायमस्य न पारयंति। अत्र विदंतीति द्विती
यमन्ययोगव्यवछेदपरं यथा व[illegible]दवद्दजितःसुशत्रुर्नहतोजल्प[illegible]तवतवास्मीति। चित्रं चित्र ग्रं४
मरोदाक्षा हेति परं मृते पुत्र इत्येव मादेहर्ष भयशोकाद्युक्तेष्व करि कथितं पदं गुणो लाटानुप्रासे
अर्थातरसंक्रमितवाच्ये विहितस्यानुवाद्यत्वे वाक्रमेणोदाहरणानि। सितकरकररुचिरविभावि
भाकराकार धरणिधवकीर्त्तिः। पौरुषकमलाकमलासापितवैवास्तिनान्यस्यात्तालाजाज राम. ६१
धनो२

त्ति गुणाज्ञानुसादेसहित्र्अएहिघेपं तिरइ किरणानुगाहि आइंहोंतिकमलाइंकमलाइं। जितेंद्रि
यत्वं विनयस्यकारणं गुणप्रकर्षो विनयादवाप्यते गुणप्रकर्षेण जनोनुरज्यते जनानु
रागप्रभवाहि संपदः पतत्प्रकर्षमपिक्वचिद्गुणः यथा। उदाहृते प्रागप्राप्तेत्यादौ। समाप्तपु
४ त्व नरात्तं क्वचिन्नगुणो नदोषः। यत्रनविशेषणमात्रदानार्थं पुनर्ग्रहणं मपितुवाक्यांतरमे
वक्रियते। यथा त्रैवप्रागप्राप्तेत्यादौ। अपदस्थसमासं क्वचिद्गुणः यथा। उदाहृते रक्ताशो
केत्यादौ। गर्भितंतथैव। यथा हुम्मि अवहत्थिअ्ररेहो णिरंकुसो अहविवेअरहिओवि।
सिविणोवितुवंमि पुणोपत्तिहिंपत्तिंमपुहसिमि। अत्रप्रतोहातिमध्ये दृढप्रत्ययोत्पाद
दु२ नाय। एवमन्यदपि लक्ष्यात्क्षिप्य। व्यभिचारिरसस्थायिभावानांशब्दवाच्यता। कष्टकल्पन
याव्यक्तिरनुभावविभावयोः। प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः। अकांडेप्रथनछेदावं पुनः२
गस्याप्यतिविस्तृतिः। अंगिनोननुसंधानं प्रकृतीनां विपर्ययः। अनंगस्याभिधानं च र

कप्र
६२

सैंदोषाः स्फुराद्दृष्टाः स्वशुद्धोपादानं व्यभिचारिणोयथा सर्व्वाङ्गाद्ययितानने सकरुणा मातंग
चर्म्मीबरे सत्त्वासा भुजगे सविस्मयरसा चेंदुं मृतस्यंदिनि सेर्ष्या जन्हुसुता विलोकन विधौ दी
नाकपालोदरे पार्वत्या नवसंगम प्रणयिनी दृष्टिः शिवाया स्तु वः । अत्र व्रीडादीनां वाचकत्वे
४आ [redacted] नम्राद्ययितानने मुकुलिता मातंग चर्म्मीबरे सोत्कंपा भुजगे निमेषरहिता चंद्रे मृत
स्यंदिनि । मीलद्भ्रूः सुरसिंधुदर्शन विधौ म्लाना कपालोदरे इत्यादि तु युक्तं रसस्य स्वशब्देन श्रृं
गारादिशब्देन वा वाच्यत्वं । तामनंग जयमंगल श्रियं किंचिदुच्च भुजमूल लोकितां नेत्रयोः कृत
वतोस्य गोचरे कोप्य जायत रसो निरंतरः । आलोक्य कोमल कपोलतला भिषक्त व्यक्तानुरा
गसुभगामभिराम रूपां । पश्येष बाल्यमतिवृत्य विवर्त्तमानः श्रृंगार सीमनि तरंगित मा
तनोति स्थायिनोयथा । संप्रहारे प्रहरणैः प्रहाराणां परस्परं । णा[redacted]त्कारैः श्रुतिगतैरुत्सा
हस्तस्य कोप्यभूत्तत्र वीरोत्साहस्य । कर्पूरधूलिधवलद्युतिपूरधौत दिङ्मंडले शिशिररो राम

३२ ६२

चिषितस्यपून ॥ लीलाशिरोंशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नयनावनौसा । अ
त्रोद्दीपनालंबनरूपाः श्रृंगारयोग्या विभावा अनुभावाय व्यवसायिनः स्फुटं इति कष्टकल्पनाप
रिहरतिरत्ति मतिं लुनीते स्खलति तरां परिवर्त्तते च भूयः । इति बत विषमा दशास्य देहं परिभवति
प्रसभं किमत्र कुर्मः । अत्र रतिपरिहारादीनां अनुभावानां करुणादावपि संभवात्कामिनारूपो
विभावो यत्नतः प्रतिपाद्यः । प्रसादे वर्त्तस्व प्रकटय मुदं संत्यज रुषं प्रिये शुष्यंत्यंगान्यमृतमिव
ते सिंचतु वच[redacted] । निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं न मुग्धे प्रत्येतुं प्रभ
वति गतः कालहरिणः । अत्र श्रृंगार प्रतिकूलस्य शांतस्यानित्यताप्रकाशनरूपो विभावस्त
त्प्रकाशितो निर्वेदस्य व्यभिचार्युपात्तः । हु अमरांम्भिलोअणायह म्मिपदिएगुरूरा
मज्झम्मि । सअलपरिहारहिअए अवणगमणं चेअ महइ वहू । अत्र सकलपरिहारवन
गमनेशातानुभावौ । इंधनाद्यानयनव्याजेनोपभोगार्थं वनगमनं चेन्न दोषः । दीप्ति

कप्र. पुनःपुनर्यथा। कुमारसंभवे रतिप्रलापे। अकांडे प्रथनं यथा। वेणीसंहारे द्वितीयेंऽके नेकवीरसं बी२
६३ क्षये प्रवृत्ते भानुमत्या सह दुर्योधनस्य शृंगारवर्णनं। अकांडे छेदो यथा। वीरचरिते द्वितीयेंऽके राघवे
भार्गवेण वयो धर्षिते धिक्कृते वा रसे कंकणमोचनाय गच्छामीति राघवस्योक्तौ। अंगस्या
प्रधानस्य अतिविस्तरेण वर्णनं। यथा। हयग्रीववधे हयग्रीवस्य। अंगिनोननुसंधा
नं यथा। रत्नावल्यां चतुर्थेंऽके बाभ्रव्यागमने सागरिकाया विस्मृतिः। प्रकृतयो दिव्या
अदिव्याः दिव्यादिव्याश्च। वीररौद्रशृंगारशांतरसप्रधाना धीरोदात्त धीरोद्धत धीरल
ललित धीरप्रशांताः उत्तमा [redacted] त्तररतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृति
घ२ वद्दिव्येष्वपि किंतु रतिः संभोगशृंगाररूपा उत्तमदेवताविषया न वर्णनीया। तद्वर्ण
नं हि पित्रोः संभोगवर्णनमिवात्यंतमनुचितं। क्रोधं विभो संहर संहरेति यावद्गि
रः खे मरुतां चरंति। तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार। इत्युक्त राम.
६३

धममधममाश्च ४

वत्तत्क्रुधादिविकारविवर्जितः सद्यः फलदः कोपः। स्वःपातालगमनसमुद्रोल्लंघना
द्युत्साहश्च दिव्येष्वेव। अदिव्येषु तु यावदवदानं प्रसिद्धमुचितं तावदेवोपनिबद्धव्यं।
अधिकं तु निबध्यमानमसत्यप्रतिभासेन नायकवद्वर्तितव्यं न प्रतिनायकवदित्यु
पदेशो न पर्यवस्येत्। दिव्यादिव्येषु उभयथापि। एवमुक्तस्यौचित्यस्य दिव्यादीना
मिव धीरोदात्तादीनामप्यन्यथा वर्णनं विपर्ययः। तत्रभवन् भगवन्नित्युत्तमेन नाध
मेन मुनिप्रभृतौ न राजादौ भट्टारकेति राजादौ परमेश्वरेति न मुनिप्रभृतौ प्रकृतिवि
पर्ययापत्तेर्वाच्यं। एवं देशकालवयोजात्यादीनां वेषव्यवहारादि समुचितमे
वोपनिबद्धव्यं। अनंगस्य रसानुपकारस्य वर्णनं यथा। कर्पूरमंजर्यां नायिक
या स्वात्मना च वसंतस्य वर्णनमनादृत्य बंदिवर्णितस्य राज्ञो प्रशंसनाई हद्रा।

इतिनायिकापादप्रहारादिना नायककोपादिवर्णनं उक्तं हि ध्वनिकृता। अनौ
चित्यादृते नान्यद्रसभंगस्य कारणं। प्रसिद्धौचित्यबंधस्तु रसस्योपनिषत्प
रेति। इदानीं क्वचिद्दोषा अप्येते इत्युच्यते। न दोषः स्वपदेनोक्तावपि संचारि
णः क्वचित्। यथा। औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया
तैस्तैर्बंधुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः। दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सं
गमे संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः। अत्रौत्सुक्यशब्दवत्तदनुभा
वो न तथा प्रतीतिकृत्। अत एव दूरादुत्सुकमित्यादौ व्रीडानुभावानां विचलितत्वादीना
मिवौत्सुक्यानुभावस्य सहसा प्रसरणादिरूपस्य तथा प्रतिपत्तिकारित्वाभावा
दुत्सुकमिति कृतं। संचार्यादेर्विरुद्धस्य बाध्यस्योक्तिर्गुणावहा बाध्यत्वेनोक्तिर्न

५१ परं दोषौ यावस्वकृततरसपरिपोषकत्वात्। यथा। काकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि
दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कांतं मुखं। किं वक्ष्यंत्यपकल्मषाः कृत
धियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति। इत्यादौ
अत्र वितर्कादिषूद्भेदेऽपि चिंतायामेव विश्रांतिरिति प्रकृतरसपरिपोषः। पांडुक्षा
मं वदनं हृदयं सरसं तवालसं च वपुः। आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः। इत्यादौ
साधारणत्वं पांडुतादीनामिति न विरुद्धत्वे ससंभ्रमनोरमारीमाः सत्वरं मर्यविभूतयः। किंतु
मत्तांगनापांगभंगलोलं हि जावितमित्याद्य अर्द्धं बाध्यत्वेनैवोक्तौ जावितादप्यधिक
मपांगस्यास्थिरत्वमिति प्रसिद्धतद्गुणोपमानतयोपात्तं संत शांतमेव पुष्णातीति न पुनः
शृंगाररसस्यात्र प्रतीतिः। तदंगाप्रतिपत्तेः। ननु विनेयोन्मुखीकरणमत्र परिहारः।

क.प्र.
६५

परमदोषो यावत् [redacted]कता यथा। क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयो
ऽपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कांतं मुखं। किं वक्ष्यंत्यपकल्मषाः
कृतधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यतीत्यादौ।
अत्र वितर्कादिर्भूत्वेऽपि चिंतायामेव विश्रांति[redacted]रसपरिपोषः पाठस्तु मवदनं हृ
द्यं सरसं तवालसं च वपुः। आवेदयति नितांतं क्षेत्रियरोगं सखि हृदंतः इत्यादौ साधारणत्वे
पांडुतादीनामिति न विरुद्धता सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः। किंतु मत्तांग
नापांगभं[redacted]मवाद्यमर्द्धं वा ध्वलेनैवोक्तं जीवितादेः[redacted]चिकेतनपांगस्या
स्थिरत्वमिति प्रसिद्धं तत्तु लोपमानतयोपात्तं सतत्प्रातमेव पुष्पा[redacted]
स्यात्र प्रतीतिः। तदंगाप्रतिपत्तेः न तु विभावानुभावकरणमत्र परिहारः। शांतशृंगारयो राम. ६५

शांतशृंगारयोर्नैरंतर्यस्याभावात्। नापि काव्यशोभाकरं। रसांतराद्यनुप्रासाद्यात यः शो...
वात्। आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः। रसांतरेणांतरितो नैरंतर्येण यो रसः।
वीरभयानकयोरेकाश्रयत्वेन विरोध इति प्रतिपक्षगतत्वेन यानकोऽनिवेशयितव्य भ२
। शांतशृंगारयोर्नैरंतर्येण विरोध इति रसांतरमंतरे कार्यं यथा नागानंदे शांतस्य जीमू
तवाहनस्य अहो गीतमहो वादित्रमित्यद्भुतमंतर्निवेश्य मलयवतीं प्रति शृंगारो निबद्धः
न परं प्रबंधे यावदेकस्मिन्नपि वाक्ये रसांतरव्यवधिना विरोधो निवर्त्तते यथा। भूरेणु
दिग्धान्नवपारिजातमालारजोवासितबाहुमध्याः। गाढं शिवाभिः परि[illegible]रभ्यमा
णान्सुरांगनाश्लिष्टभुजांतरालाः। सशोणितैः क्रव्यभुजां स्फुरद्भिः पक्षैः खगानामुपवी
ज्यमानान्। संवीजिताश्चंदनवारिसेकैः सुगंधिभिः कल्पलतादुकूलैः। विमानपर्यंक

कप्र
६६

तलेनिषस्मा कुतूहलाविष्टतयातदानीं । निर्दिश्यमानान्ललनांगुलीभिर्वीराः स्वदेहान्प
तितानपश्यन् । अत्र बीभत्सशृंगारयोरंतर्वीररसो निवेशितः । स्मर्यमाणो विरुद्धोपि
साम्येनाथ विवक्षितः । अंगिन्यंगत्वमाप्तौ यौ तौ न दुष्टौ परस्परं । यथा । अयं स रसनो
त्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः । एतद्भूरिश्रव
सः समरभुवि पतितं हस्तमवलोक्य तद्वधूरिदमभिदधौ । अत्र पूर्वावस्थास्मरणं शृंगा
रांगमपि करुणं परिपोषयति । दंतक्षतानि करजैश्च विपाटितानि प्रोद्भिन्नसांद्रपुलके
भवतः शरीरे दत्तानि रक्तमनसा मृगराजवध्वा जातस्पृहैर्मुनिभिरप्यवलोकितानि ।
अत्र का[redacted]मुकस्य दंतक्षतादीनि यथा चमत्कारका[illegible]रीणि तथा जिनस्य[illegible]
यथा वा परः शृंगारी तदवलोकनात्सस्पृहः । तद्वदेते तद्दृश[illegible]मुनय इति साम्यविवक्षा

क्रामंत्यः क्षतकोमलांगुलिगलद्रक्तैः सदर्भाः स्थलीः पादैः पातितयावकैरिव पतद्बा
ष्पांबुधौताननाः । भीता भर्तृकरावलंबितकरास्त्वच्छत्रुनार्योधुना दावाग्निं परितो भ्र
मंति पुनरप्युद्यद्विवाहा इव । अत्र चाटुके राजविषयारतिर्या प्रतीयते । तत्र करुणा
इव शृंगारोप्यंगमिति तयोर्न विरोधः । यथा । एहि गच्छ पतोत्तिष्ठ वद मौनं समाच
र । एवमाशाग्रहग्रस्तैः क्रीडंति धनिनोर्थिभिः । इति । अत्र एहीति क्रीडंतीति गच्छे
ति क्रीडंतीति इति क्रीडायेक्षयोरागमनगमनयोर्न विरोधः । क्षिप्तो हस्तावलग्नः
प्रसभमभिहतोप्याददानोंशुकांतं गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः
संभ्रमेण । आलिंगन्योवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रा
पराधः स दहतु दुरितं शांभवो वः शराग्निः । इति । अत्र त्रिपुररिपुप्रभावातिश

काप्र
६१

यस्य करुणांगता स्य च शृंगारः। तथापि न करुणे विश्रांतिरिति तस्यांगतैव। अथवा प्राग
यः कामुक आचरति स्म तत् शशांकशेखरे इति शृंगारपरिपोषितेन करुणो न मुख्य एवार्थ उपो
द्बलयते। उक्तं हि। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि व
र्तत इति। एवं च प्रतिपादितस्वरूपस्य परस्परसंनिपाते रसान्तरेण विरोधो नाप्यंगिभावो भवतीति रस
शब्देनात्र स्थायिभावोऽप्युपलक्ष्यते॥ ॥इति श्रीकाव्यप्रकाशे दोष[redacted]नाम सप्तम उल्लासः॥
॥एवं दोषानुक्त्वा गुणालंकारविवेकमाह। ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः। उत्कर्ष
हेतवस्ते स्युरचलस्थितयो गुणाः॥ आत्मन एव हि शौर्यादयो यथा नाकारस्य। तथा रसस्यैव माधु
र्यादयो न वर्णानां। क्वचित्तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनात् आकार एवास्य शूर
इत्यादेर्व्यवहारादन्यत्राशूरेऽपि विततत्वाकृतिमात्रेण शूर इति। क्वापि शूरेऽपि मूर्तिलाघवे

वमात्रेण अशूर इति अविश्रांतप्रतीतयो यथा व्यवहरंति। तद्वन्मधुरादिरसव्यंजकसुकुमारादि
वर्णानां माधुर्यादिव्यवहारप्रवृत्तेरमधुरादिरसांगानां वर्णानां सौकुमार्यादिमात्रेण माधुर्या
दि। मधुरादिरसोपकरणानामेतेषां असौकुमार्यादेरमाधुर्यादिरसपर्यंतविश्रांतप्रतीतिवं
ध्याः व्यवहरंति। अतएव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यज्यंते। न तु वर्णमात्राश्रया
यथैषां व्यंजकत्वं तथोदाहरिष्यते। उपकुर्वंति तं संतं येंऽगद्वारेण जातुचित्। हारादिवदलंका
रास्तेऽनुप्रासोपमादयः। ये वाच्यवाचकलक्षणांगातिशयमुखेन मुख्यं रसं संभविनमु
पकुर्वंति ते कंठाद्यंगानामुत्कर्षाधानद्वारेण शरीरिणामप्युपकारका हारादय इवालंका
राः। यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसिताः। क्वचित्तु संतमपि नोपकुर्वंति। य
था। अपसारय घनसारं कुरु हारं दूर एव किं कमलैः। अलमलमालि मृणालैरिति वदति दि

का.प्र
६८

वानिशंबाला इत्यादौ वाचकमुखेन । मनोरागस्तीव्रं विषमिव विसर्पत्यविरतं प्रमाथी निर्द्धू
मो ज्वलति विधुतः पावक इव । हिनस्ति प्रत्यंगं ज्वर इव बलीयानित इतो न मां त्रातुं पि
भवति न चांबा भवती इत्यादौ वाच्यमुखेनालंकारौ रसमुपकुरुतः । चित्ते विहट्टदि ण टुट्ट उ२
दि सा गुणेसु सेज्जाइ लोट्टदि विसट्टदि दिम्मुहेसु । बोलम्मि वट्टदि पअट्टदि कव्वबंधे झाणे ण तुट्ट
दि चिरं तरुणी तरट्टी । इत्यादौ वाचकमेवाभिव्यंजकमपि गत्वे सरोरुहवनेबद्धाननेनेताम्यति क्रंदत्सु नू
मरेषु वाद्यपदायितासकौ युरः सारसं । चक्राह्नेन वियोगिना विसलता नास्वादिता नोज्झिता वक्त्रे
केवलमर्गलेव निहिता जीवस्य निर्गच्छतः इत्यादौ वाच्यमेव न तु रसं । अत्र विसलता जीवरो
धनक्षमेति प्रकृतानतु गुणोयमः । एष एव च गुणालंकारयोर्विभागः । एवं च समवायवृत्त्या
शौर्यादयः संयोगवृत्त्या तु हारादयः । इति गुणालंकाराणां भेदः । ओजः प्रभृतीनामनुप्रा

प्रसादीनां चो नये बामनपि समवायवृत्त्या स्थितिरिति गड्डरिकाप्रवाहेणैषां भेदकथनं इत्यभिधा
न मसत्यपदप्युक्तं काव्यशोभायाः कर्त्तारो धर्म्मा गुणा [illegible] स्तदतिशयहेतवस्त्वलंकारा
इति । तदपि न युक्तं । यतः किं समस्तैर्गुणैः काव्यव्यवहार उत कतिपयैः । यदि समस्तैस्तत्कथम
समस्तगुणा गौडी पांचाली रीतिः काव्यस्यात्मा । अथ कतिपयैः ततः अद्रावत्र प्रज्वलत्यग्नि
रुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूम इत्यादावोजः प्रभृतिषु गुणेषु सत्सु काव्यव्यवहारः प्रा
प्नः । स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिना अस्या रदच्छदरसो न्यक्करोति तरां सुधां इत्यादौ विशे
षोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारप्रवर्त्तकौ इदानीं गुणानां भेदमाह ॥ माधु
र्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश ॥ एषां क्रमेण लक्षणमाह । आह्लादकत्वं माधुर्यं शृं
गारे द्रुतिकारणं । शृंगारे ह्यात्मभोगे द्रुतिर्गलितत्वमिवाश्रव्यत्वं पुनरोजःप्रसादयोरपि । कत

काप्र. रो विप्रलंभे तच्छांते चातिशयान्वितं । अत्यंतद्रुतिहेतुत्वात् । दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थि
तिः । चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः । बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च । वी
९७ राद्बीभत्सरौद्रे सातिशयमोजः । शुष्केंधनाग्निवत्स्वच्छजलवत्सहसैव यः । व्याप्नोत्य
न्यत्प्रसादोसौ सर्वत्र विहितस्थितिः । अन्यदिति व्याप्यमिह चित्तं । सर्वत्रेति सर्वेषु रसेषु स
र्वासु रचनासु च । गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्मता । गुणवृत्त्या उपचारेण तेषां
गुणानां । आकारे शौर्यस्येव । कुतस्त्रय एव न दशेत्याह । केचिदंतर्भवंत्येषु दोषत्यागा
त्परे श्रिताः । अन्ये भजंति दोषत्वं कुत्रचिन्न ततो दश । बहूनामपि पदानामेकपदवद्भासमा
नात्मा यः श्लेषो यश्चारोहावरोहक्रमरूपः समाधिर्या च विकटत्वलक्षणा उदारता यश्चौजोमि
श्रितशैथिल्यात्मा प्रसादस्तेषामोजस्यंतर्भावः । पृथक्पदत्वरूपं माधुर्यं भंग्या साक्षादुक्तं । राम ९९

प्रसादेनार्थव्यक्तिर्गृहीता । मार्गाभेदरूपा समता क्वचिद्दोषः । तथाहि मातंगाः किमु वल्गितैरित्या
दौ सिंहाभिधाने मसृणमार्गत्यागो गुणः । कष्टत्वग्राम्यत्वयोर्दुष्टताभिधानान्निराकर
णेन पारुष्यरूपं सौकुमार्यमौज्ज्वल्यरूपा कांतिश्च स्वीकृताः । एवं न दश शब्दगुणाः । पदार्थे वा
क्यरचना वाक्यार्थे च पदाभिधा । प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य चेति । या प्रौढि
रोज इत्युक्तं तद्वैचित्र्यमात्रं न गुणः । तदभावेपि काव्यव्यवहारप्रवृत्तेः । अपुष्टार्थत्वाधिकपदत्वा
नवीकृतत्वामंगलरूपाश्लीलग्राम्याणां निराकरणेन साभिप्रायत्वरूपमोजोर्थवैमल्या
त्मप्रसाद उक्तिवैचित्र्यरूपं माधुर्यमपारुष्यरूपं सौकुमार्यमग्राम्यत्वरूपोदारता च स्वीकृ
ता । अभिधास्यमानस्वभावोक्त्यलंकारेण रसध्वनिगुणीभूतव्यंग्याभ्यां च वस्तुस्वभा
वस्फुटत्वरूपार्थव्यक्तिर्दीप्तरसत्वरूपा कांतिश्च स्वीक्रियते । क्रमकौटिल्यानुल्बणत्वो
पपत्तियोगरूपघटनात्मा श्लेषोपि विचित्रत्वमात्रं न गुणः । अवैषम्यरूपा समता दोषा

काप्र.
७०

भावमात्रेण पुनर्गुणाः । कः खलु अनुन्मत्तोऽन्यप्रस्तावेऽन्यदभिदध्यात् । अर्थस्यापि योनेन्य २२
च्छायायोनेर्वा यदि न भवति दर्शनेन तत्कथं काव्यमित्यर्थदृष्टिरूपः समाधिरपि न गुणः
तेन नार्थगुणा वाच्याः । वाच्याः वक्तृन्याप्याः प्रोक्ताः शब्दगुणाश्चये वर्णाः समासो रच
ना तेषां व्यंजकतामिताः । केकस्येत्याह । मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू । अवृत्ति
र्मध्यवृत्तिर्वा माधुर्ये घटना तथा । टठडढवर्ज्याः कादयो मांताः शिरसि निजवर्गान्त्येन युक्ताः । तथा
रेफणकारौ ह्रस्वांतरिताविति वर्णाः । समासाभावो मध्यमसमासो वेति समासः । तथा मा
धुर्यवत्पदांतरयोगे रचना माधुर्यस्य व्यंजिका । उदाहरणं यथा । अनंगरंगप्रतिमं तदंग
भंगीभिरंगीकृतमानतांग्याः । कुर्वंति यूनां सहसा यथैताः स्वांतानि शांतापरचिंतनानि ।
योग आद्यतृतीयाभ्यामंत्ययो रेण तुल्ययोः । टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओज
सि । वर्गप्रथमतृतीयाभ्यां तत् द्वितीयचतुर्थयो रेफेण अधउपर्युभयत्र वा यस्य राम
७०

७२

कस्यचित्तुल्ययोस्तु न तस्यैव बंधः टवर्गोऽपि रणकारवर्जः । शकारषकारौ दीर्घः समासो
विकटः संघटना चेत्योजसः । उदाहरणं मूर्ध्नामुद्वृत्तकृत्तेत्यादि । श्रुतिमात्रेण शब्दात्तु येनार्थप्र
त्ययो भवेत् । साधारणः समग्राणां स प्रसादो गुणः स्मृतः । समग्राणां रसानां संघटनानां च । उदा
हरणं । परिम्लानं पीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतः परिमलनमप्राप्य हरितं ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः कृशांग्याः संतापं वदति बिसिनीपत्रशयनं । यद्य
पि गुणपरतंत्राः संघटनादयस्तथापि । वक्तृवाच्यप्रबंधानामौचित्येन क्वचित्क्वचित् रच
नावृत्तिवर्णानामन्यथात्वमपीष्यते । क्वचिद्वाच्यप्रबंधानामनपेक्ष्य वक्त्रौचित्या
देव रचनादयः । यथा । मंथायस्तार्णवांभःप्लुतकुहरचलन्मंदरध्वानधीरः कोणाघा
तेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचंडः । कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पा

का.प्र.
११

तन्निर्व्यातवातः केनास्मै सिंहनादप्रतिरसितसखो दुंदुभिस्ताडितोयं। अत्र तद्दिवाच्यं क्रोधादिव्यंजकं अभिनेयार्थं च काव्यमिति तत्प्रतिकूला उद्धता रचनादयः। वक्त्रा वाच्यम
नेन। क्वचिद्वक्तृप्रबंधानपेक्षया वाच्यौचित्यादेव रचनादयः। यथा। प्रौढछेदानुरूपो
च्छलनरयभवत्सैंहिकेयोपघातत्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्य
माणां। कुर्वत्काकुत्स्थवीर्यस्तुतिमिव मरुतां कंधरा रंध्रभाजां झांकारै भीम
मेतन्निपतति वियतः कुंभकर्णोत्तमांगं। क्वचिद्वक्तृवाच्यानपेक्ष्यया प्रबंधौचि
त्यादेव। तथा आख्यायिकायां शृंगारेपि न मसृणा वर्णाः। कथायां रौद्रेपि
नात्यंतमुद्धताः। नाटकादौ रौद्रेपि न दीर्घसमासादयः। एवमन्यदप्यौचित्यम
नुसर्तव्यं॥ ॥इति काव्यप्रकाशे गुणालंकारभेदे नियतगुणनिर्णयो राम
११

नामाष्टम उल्लासः॥ ॥गुणविवेचने ऽलंकाराः प्राप्तावसरा इति शब्दालंकारानाह। यदुक्तम
न्यथा वाक्यमन्यथान्येन योज्यते। श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा। तथे
ति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्चेति। तत्र पदभंगश्लेषेण यथा। नारीणामनुकूलमाचर
सि चेज्जानासि कश्चेतनो वामानां प्रियमादधाति हितकृन्नैवाबलानां भवान्। युक्तं किं हि
तकर्त्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरंदरमतश्छेत्तुं विधातुः कुतः। अभंग
श्लेषेण यथा। अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता। त्रिगुणा श्रूयते बुद्धिर्न तु दारुम
यी क्वचित्। काक्वा यथा। गुरुपरतंत्रतया बत दूरतरं देशमुद्यतो गंतुं। अलिकुलको
किललतिते नैष्यति सखि सुरभिसमये सौ। ... वर्णसाम्यमनुप्रासः स्वरवै

काप्र. ७२

साहृश्येपिव्यंजनसहृशत्वंवर्णसाम्यं।रसाद्यनुगुणः प्रकृष्टोन्यासोऽनुप्रासः।छेकवृत्ति
गतत्वेन द्विधा।छेकाविदग्धाः।वृत्तिर्नियतवर्णगतोरसविषयोव्यापारः।गतइतिछेकानु
प्रासोवृत्त्यनुप्रासश्चेति।किंतयोःस्वरूपमित्याह।सोनेकस्यसकृत्पूर्वः।अनेकस्यव्यंज
नस्यसकृदेकवारंसादृश्यंछेकानुप्रासः।उदाहरणं।ततोरुणपरिस्पंदमंदीकृतवपुःश
शी।दध्रेकामपरिक्षामकामिनीगंडपांडुतां।एकस्याप्यसकृत्परः।एकस्यअपिशब्दा
दनेकस्यव्यंजनस्यद्विर्बहुकृत्वोवासादृश्यंवृत्त्यनुप्रासः।तत्रमाधुर्यव्यंजकैर्वर्णै
रुपनागरिकेष्यते।ओजःप्रकाशकैस्तैस्तुपरुषा।उभयत्रापिप्रागुदाहृतं।कोमलापरैः
परैःशेषैस्तामेवकेचिद्ग्राम्येतिवदंति।उदाहरणं।अपसारयघनसारमित्यादि।केषां राम ७२

चिदेतावैदर्भीप्रमुखारीतयोमताः।एतास्तिस्रोवृत्तयोवामनादीनांमतेवैदर्भीगौडीपांचाल्या
ख्यारीतयउच्यंते।शाब्दस्तुलाटानुप्रासोभेदेतात्पर्यमात्रतः।शब्दगतोनुप्रासः।शब्दार्थयोरभे
देपिअन्वयमात्रभेदाल्लाटजनवल्लभत्वाल्लाटानुप्रासः।एषपदानुप्रासइत्यन्ये।पदानां
सः।सइतिलाटानुप्रासः।उदाहरणं।यस्यनसविधेदयितादवदहनस्तुहिनदीधितिस्तस्य।
उत्तरार्द्धेनस्थानेचइतिपाठः।शेषंसमानं।पदस्यापि।अपिशब्देनसइतिसमुच्चीयते।उ
दाहरणं।वदनंवरवर्णिन्यास्तस्याःसत्यंसुधाकरः।सुधाकरःक्वनुपुनःकलंकविकलोभवेत्।
वृत्तावन्यत्रतत्रनाम्नःसवृत्त्यवृत्त्योश्च।एकस्मिन्समासेभिन्नेवासमासेसमासासमासयोर्वा
नाम्नःप्रातिपदिकस्याननुपदस्यसारूप्यं।उदाहरणं।सितकरकररुचिरविभाविभाकराका
रधरणिधवकीर्त्तिः।पौरुषकमलाकमलासापितवैवास्तिनान्यस्यास्तितदेवंपंचधामतः।

म २

कप्र· २३ अर्थेसत्यर्थभिन्नानांवर्णानांसापुनःश्रुतिः। यमकं। समरसमरसोयमित्यादावेकेषामर्थवत्वे
[illegible] न्येषामनर्थकत्वेभिन्नार्थानामिति नयुज्यतेवक्तुमित्यर्थसतीत्युक्तं। सेतिस्वरोर
सइत्यादिवैलक्षण्येनतेनैवक्रमेणास्थिता। पादतद्भागवृत्तितद्यामनेकता। प्रथमोद्वितीया
दौद्वितीयस्तृतीयादौतृतीयश्चतुर्थेः प्रथमस्त्रिष्वपीतिसप्त। प्रथमोद्वितीयेतृतीयश्चतुर्थ
इतिप्रथमश्चतुर्थेद्वितीयस्तृतीयइति द्वितदेवंपादजंनवभेदं। अर्द्धावृत्तिःश्लोकावृत्तिश्चे
तिद्वे। द्विधाविभक्तेपादेप्रथमादिपादाद्यादिभागःपूर्ववद्द्वितीयादिपादाद्यादिभागेष्वंतभागोंतभा
गेष्विति विंशतिर्भेदाः श्लोकांतरेहिनभागावृत्तिः। त्रिखंडेत्रिंशत्। चतुःखंडेचत्वारिंशत्। प्रथ
मपादादिगतांत्यार्द्धादिभागोद्वितीयपादादिगते आद्यार्द्धादिभागेयम्यतइत्याद्यन्वर्थ
तानुसरणेनानेकभेदं अंतादिकमाद्यंतिकं। तत्समुच्चयः। मध्यादि [illegible] कमादिमध्य एम
२३

मंतमध्यंमध्यांतंतेषांसमुच्चयस्तथातस्मिन्नेवपादे। आद्यादिभागानांमध्यादिभागेष्वनियतेत
वस्थानेआवृत्तिरितिप्रभूततमभेदं। तदेतत्काव्यांतर्गडुभूतमितिनास्यतत्क्षणंकृतं दिङ्मात्रमुदा
हीक्रियते। सन्नारीभरणोमायमाराध्यविधुशेखरं। सन्नारीभरणोमायः ततस्त्वंपृथिवींजयवि
नायमेनोनयतासुखादिना। विनायमेनोनयतासुखादिना। महाजनोदायतमानसादरंमहा
जनोदायतमानसादरं। सलीलंभरतोवश्यमबलंविततारवं। सर्वदारणमानैषीद्देवानल
समस्थितः। सत्वारंभरतोवश्यमवलंविततारवं। सर्वदारणमानैषीद्देवानलसमस्थितः। अ
नंतमहिमव्याप्तविश्वांवेधानवे [illegible] दयां। यावमातेवभजतेप्रणतेमानवेदयां। यदानतो
यदानतोनयात्ययं शिवेहितांशिवेहितां स्मरामितांस्मरामितां। सरस्वतिप्रसादंमेस्थि
तिंचित्तसरस्वतिसारस्वतिकुरुक्षेत्रकुरुक्षेत्रसरस्वति। ससारसाकंदर्पेणाकंदर्पेणा

नपात्यपर

काप्र· १४

ससारसा। शरन्नवा नाविभ्राणाना विभ्राणा। शरन्नवा मधुपराजिपराजितमानिनीज
नमनः सुमनः सुरभिश्रियं। अभृत वारितवारिजविप्लवस्फुरितताम्रतताम्रवरां जग
त्। एवंवैविध्यसहस्रैः स्थितमन्यदुन्नेयं। वाच्यभेदेन भिन्ना यद्युगपद्भाषणस्पृशः श्लि
ष्यंति शब्दाः श्लेषोसावक्षरादिभिरष्टधा। अर्थभेदेन शब्दभेदः इति दर्शने काव्यमार्गे स्व
रो न गण्यत इति च दर्शने वाच्यभेदेन भिन्ना अपि शब्दा यद्युगपदुच्चारणेन श्लिष्यं
ति भिन्नं स्वरूपमपह्नुवते स श्लेषः। स च वर्णपदलिंगभाषाप्रकृतिप्रत्ययविभक्तिवचनानां
भेदादष्टधा। क्रमेणोदाहरणं। अलंकारः शंकाकरनरकपालं परिजनो विशीर्णांगो भृंगी
वसु च वृष एको बहुवयाः। अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि
स्थितवति वयं के पुनरमी। पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव। विलसत्क

राम· १४

रेणुगहनं संप्रति सममावयोः सदनं। नक्तिप्रकृ विलोकनप्रणयिनीनालोकसलस्पर्द्धिनी
ध्यानालंबनतां समाधिनिरतैर्नीते हितप्राप्तये। लावण्यमहानिधी रसिकतां लक्ष्मीदृशो
स्तन्वता युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः। एष वचनश्लेषोपि। महदे सुरसंध
म्मे तमवसमासंगमागमाहरणे हर बहुसरणं तं चित्तमोहमवसर उमे सहसा। अयं स
र्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति। सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः। रजो
निरमराणां मौलैः पादपद्मावलोकशरणसमयपराप्राप्तपूर्वसंपत्सहस्रं। प्रभानिवहमध्ये तान्वि
तवस्यसादादृहमुवितरुचिः स्यान्नंदितासातयामोर्वि स्वं हर सर्वस्य त्वं भवद्धेद्यतत्परः। नये
पकासां मुख्यमायासितनुवर्त्तनं। नेदा माचार्यकृतस्यादेर्भेदोपि नवभो भवेत्। नवमेंपास
पिर्भिन्नक्रमः। उदाहरणं। प्रोंसत्कुसरगोत्राणां मघदेकदेशरूपसमनः। शतकोटिदतां बिभ्रद्विबु

ते१

कप्रः पेट्टं सरागं॥ अत्र प्रकरणादिनियमाभावाद्द्वावप्यर्थौ वाच्यौ॥ ननु स्वरितादिगुणभेदाद्भिन्न
७५ प्रयत्नोच्चार्याणां तद्भेदाद्भिन्नप्रयत्नोच्चार्याणां च शब्दानां बंधे संस्कारान्तरप्रतिभोत्प
न्निहेतुः शब्दश्लेषो अर्थश्लेषश्चेति द्विविधोप्ययमर्थालंकारमध्ये परिगणितोऽन्यैरिति कथमयं श
ब्दालंकारः उच्यते। इह दोषगुणालंकाराणां शब्दार्थगतत्वेन यो विभागः सोऽन्वयव्यति
रेकाभ्यामेव व्यवतिष्ठते। तथा हि कष्टत्वादिगाढत्वाद्यनुप्रासादयो व्यर्थत्वादिप्रौढ्या
द्युपमादयस्तद्भावतद्भावानुविधायित्वादेव शब्दा [redacted] र्थगतत्वेन व्यवस्थाप्यन्ते।
स्वयं च पल्लवाताम्रभास्वत्करविराजिता सभंगश्लेषः। प्रभातसंध्येवास्वाप
फललुब्धेहितप्रदा इति सभंगाभंगश्लेषश्चेति। द्वावपि शब्दैकसमाश्रयाविति द्वयोरपि
शब्दश्लेषत्वमुपपन्नं नत्वाद्यस्यार्थश्लेषत्वं। अर्थश्लेषस्य तु विषयो यत्र शब्दपरि राम ७५

स२

वर्त्तनेऽपि तच्छ्लेषत्वखंडना॥ स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिं। अहो
सुसदृशी वृत्तिस्तुलाकोटेः खलस्य चेति। न चायमुपमाप्रतिभोत्पत्तिहेतुः श्लेषः। अपि तु स५२
श्लेषप्रतिभोत्पत्तिहेतुरुपमा। तथा हि। यथा। कमलमिव मुखं मनोज्ञमेतत्कचति
तरामित्यादौ गुणसाम्ये क्रिया [illegible] साम्ये उभयसाम्ये वा उ
पमा। तथा। सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिंबमिवेत्यादौ शब्दमात्र
साम्येऽपि सा युक्तैव। तथा चुक्तं रुद्रटेन। स्फुटमर्थालंकारावेतावुपमास टम४
मुच्चयौ किंतु। आश्रित्य शब्दमात्रं सामान्यमिहापि संभवत इति। न च कमलमि
व मुखमित्यादिः साधारणधर्मप्रयोगे श्लेषस्योपमाया विषय इति च युक्तं। पूर्णोपमाया निर्विष
यापत्तेः द्विवत्त्वमेव पातालमाशानां तु निबंधनं। त्वं चामरभरतरूभिरेकोऽला कत्र यात्म

काप्र.
७६

कःइत्यादौश्लेषस्यचोपमाद्यलंकारविविक्तोस्तिविषयइति।द्वयोर्योगेसंकरएवोपपत्ति
पर्यालोचनेनुपमायाएवायमुक्तोविषयः।अन्यथाविषयापहारएवपूर्णोपमायाःस्या
त्।नचअबिंदुसुंदरीनित्यंगलल्लावण्यबिंदुकेत्यादौविरोधप्रतिभोत्पत्तिहेतुःश्लेषः।अ
पितुश्लेषप्रतिभोत्पत्तिहेतुर्विरोधः।नह्यत्रार्थद्वयप्रतिपादकःशब्दश्लेषःद्वितीयार्थस्यप्रति
भामात्रस्यप्ररोहाभावात्।नचविरोधाभासइवविरोधःश्लेषाभासःश्लेषः।तस्मादेवमादि
षुवाक्येषुश्लेषप्रतिभोत्पत्तिहेतुरलंकारांतरमेव।तथाचसद्वंशमुक्तामणिः।नाल्पःकविरि
वस्वल्पश्लोकोदेवमहान्भवान्।अनुरागवतीसंध्यादिवसस्तत्पुरःसरः।अहोदैवगतिश्चि
त्रातथापिनसमागमः।आदायचापमचलंकृत्वाहीनंगुणंविषमदृष्टिः।यश्चित्रमच्युतश
रोलक्ष्यमभांक्षीन्नमस्तस्मैइत्यादावेकदेशविवर्तिरूपकव्यतिरेकसमासोक्तिविरोधत्वमु
चितंनश्लेषत्वं।शब्दश्लेषइतिचोच्यते।अर्थालंकारमध्येलक्ष्यतइतिकोयंनयः।किंचयेवि राम
७६

त्यमलंकाराइतियएवकविप्रतिभासंरंभगोचरस्तत्रैवविचित्रतेतिसैवालंकारभूमिः।अर्थमुखप्रेक्षि
तमेतेषांशब्दानामितिचेत्।अनुप्रासादीनामपितथैवेतितेप्यर्थालंकाराःकिन्नोच्यंते।रसा
दिव्यंजकस्वरूपवाच्यविशेषसव्यपेक्षत्वेप्यनुप्रासादीनामलंकारता।शब्दगुणदोषाणाम
प्यर्थापेक्षयैवगुणदोषता।अर्थगुणदोषालंकाराणांशब्दापेक्षयाचव्यवस्थितिरिति।तेपिशब्दगत
त्वेनैवोच्यंते।विधौवक्त्रेमूर्ध्निइत्यादौवर्णादिश्लेषेएकप्रयत्नोच्चार्यत्वेऽर्थश्लेषत्वं।शब्द[illegible]भेदे
पिप्रसज्यतात्पिवमादिस्वयंविचार्यं।तद्विचित्रंयत्रवर्णानांखड्गाद्याकृतिहेतुता।सन्निवेशविशे
षेणयत्रन्यस्तावर्णाःखड्गमुरजपद्माद्याकारमुल्लासयंतितच्चित्रंकाव्यं।कथंकाव्यमेतदिति।
दिङ्मात्रंप्रदर्श्यते।उदाहरणं।मारारिशक्ररामेभमुखैरासाररंहसा।सारारब्धस्तवानित्यंतदर्ति
हरणक्षमा।मातानतानांसंघट्टःश्रियांबाधितसंभ्रमा।मान्याथसीमारामाणांशंमेदिश्यादुमा
दिजा।खड्गबंधः॥सरलाबहुलारंभतरलालिबलारवा।वारलाबहुलामंदकरलाबहुलामला

कप्र
११

मुरजबंधः॥ भासते प्रतिभासाररसाभाताहताविभा। भावितात्माशुभावादे देवाभावततेसभा॥ पद्म
बंधः॥ रसासाररसासारसायताक्षक्षतायसा। सातावाततवाभासारक्षतस्त्वस्वतक्षरा॥ सर्वतोभद्रबंध
संभविनोप्यन्ये प्रभेदाः शक्तिमात्रप्रकाशकाः॥ न तु काव्यरूपतां दधतीति न प्रदर्श्यंते। पुनरुक्तवदा
भासो विभिन्नाकारशब्दगा एकार्थतेव। भिन्नरूपसार्थकानर्थकशब्दनिष्ठ एकार्थत्वेनेव मु
खे भासमानं पुनरुक्तवदाभासः। स च शब्दस्य सभंगाभंगरूपकेवलशब्दनिष्ठः उदाहरणं। अ
रिविधदेहतनुः शरारः सहसारथिसूततुरगपादातः। भाति सदानत्यागः स्थिरतायामवनितत[illegible]लति
लकः। चकासत्यंगनारामाः कौतुकानंदहेतवः। तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्त्तिनः। त
था शब्दार्थयोरयं उदाहरणं। तनुवपुरजघन्योसौ करिकुंजररुधिररक्तखर[illegible]नरवरः। तेजोधा
म महः पृथुमनसामिंद्रो हरिजिष्णुः। अत्रैकस्मिन्पदे परिवर्तिते नालंकार इति शब्दाश्रयोपरस्मिं
स्तु परिवर्तितेपि स न हीयत इत्यर्थनिष्ठेत्युभयालंकारोयं॥ ॥इति श्रीकाव्यप्रकाशे श राम
११

ब्दालंकारनिर्णयो नाम नवम उल्लासः॥ ॥अर्थालंकारानाह॥ साधर्म्यमुपमा भेदे॥ उपमा
नोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति तयोरेव समानेन धर्मेण सं
बंध उपमा भेदग्रहणमनन्वयव्यवच्छेदाय॥ पूर्णा लुप्ता च॥ उपमानोपमेयसाधारणधर्मो
पमाप्रतिपादकानामुपादाने पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता। साग्रिमा श्रौ
ती चार्थी च भवेद्वाक्ये समासे तद्धिते तथा॥ अग्रिमा पूर्णा। यथेववा[illegible]शब्दा यत्परास्तस्यैवो
पमानताप्रतीतिरिति। यद्यप्युपमानविशेषणान्येते तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठी
वत्संबंधं प्रतिपादयंतीति तत्सद्भावे श्रौत्युपमा। तथैव तत्र तस्येव इत्यनेन इवार्थे विहित
स्य वतेरुपादाने। तेन तुल्यं मित्यादावुपमेये एव तत्तुल्यमस्येत्यादौ चोपमाने एव इ
दं च तच्च तुल्यमिति धर्मिण्येव तुल्यादिशब्दानां विश्रांतिरिति साम्यपर्यालोचनया तुल्य
ताप्रतीतिरिति तत्र साधर्म्यस्यार्थत्वात्तुल्यादिपदोपादाने आर्थी। तद्वत्तेन तुल्यमित्या

काप्र
१८ द्विना विहितस्य वतेः स्थितौ ऽइवेन नित्यसमासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं
वेति नित्यसमासे इववद्भावयोगे समासगा। क्रमेणोदाहरणानि। त्वय्यपि समरेषु हा विजय
श्रीर्न मुंचति प्रस्तावप्रसक्तं कान्तं स्वाधीनपतिका यथा॥१॥ चकितहरिणलोललोचना
याः क्रुधि तरुणारुणतारहारिकांति। सरसिजमिदमाननं च तस्याः सममिति चेतसि सं
सा मदं विधत्ते॥२॥ असौ यतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपा
ये। शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार॥३॥ अवित
थमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः। सुरतरुसदृशः स भवानभिलषणीयः
क्षितीश्वर न कस्य॥४॥ गांभीर्यगरिमा तस्य सत्यं गंगाभुजंगवत्। दुरालोकः स समरे निदा
घांबररत्नवत्॥५॥ स्वाधीनभर्तृका कांतं भजमाना यथा लोकोत्तरचमत्कारनूत्नत्वाज
यश्री स्वदासेवनेनेत्यादि नाप्रतीयमानेन विना यद्यपि नोक्तैर्वैचित्र्यं वैचित्र्यं चान राम १८

वंग्य

कारस्तथापि न ध्वनिगुणीभूतव्यवहारः। न खल्वव्यंग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिर
पि तु वाच्यवैचित्र्यप्रतिभासादेवारसादित्परस्कव्यंग्यार्थालंकारान्तरं च सर्वत्राव्यभिचा
रीसगणायिष्ठेवतदलंकारा उदाहृताः। तद्धिते त्वेतन्नूद्याक्लिप्रमाणाविरसता मा वहं तिङ्ति
देशम. ष्वपि रविरुद्धत्तिधानमिति न चोदनीयं तद्धद्धस्य लोपे स्यात् श्रौती तद्धिते पुनः। धर्मि
साधारणः। तद्धिते कल्पां वा देशीया यं वा। तेन पंचधा उदाहरणानि। धन्यस्यानन्यसामान्य सौज
न्योत्कर्षशालिनः। करणीयं वचश्चेतः सत्यं तस्यामृतं यथा॥१॥ आकृष्टकर बालोसौ सं
पराये परिभ्रमन्। प्रत्यर्थिसेनया दृष्टः कृतांतेन समः प्रभुः॥२॥ करवाल इवाचारस्त
स्य वागमृतोपमा। विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे॥३॥ उपमानानुपादाने वा
क्यगाथ समासगा। स अत्र अलंकरणपरिवारामसिरिविअरताणसरसकव्वस्स। दीसइ अ

कप्र हवारीासुमनईसरिसंत्रेसंसमेत्तेरागा।८।।कच्छसेत्यत्र कच्छसमेइतिसरिसमिस्सेत्रशूरा
७९ मितिपाठेएषेवसमासगा। वादेर्लोपेसमासेसाकर्मीधारेक्यचिक्यङि। कर्मकर्त्रोरि
मुलि। वादिशब्दउपमाद्योतकइति वादेः उपमाप्रतिपादकस्यलोपेषट्। कर्मणोधिकरणा
द्योसन्नेनक्यचा कर्तुःक्यङ्। कर्मकर्त्रोरुपपदयोर्णमुलावस्सवेत्।उदा। ततःऊर्ध्वनाथेन हरणं ४
कामिनीगंडुपा...दुना। नेत्रानंदेनचंद्रेणा माहेंद्रीदिगलंकृता।। १।। असितभुजगभीषणासि
पत्रोरुरुहिका हितचित्ततूर्णचारः। पुलकिततनुरुत्कपोलकांतिःप्रतिभटविक्रमदर्शने
यमासीत।। २।। पौरंसुतीयतिजनंसमरांतरेसावंतःपुरीयतिविचित्रचरित्रयुंयुः।। नारीयतेसम चरित्रं तु
रसीम्निकृपाणपाणोरालोक्यतस्यलक्षिता निस पत्नसेना।। ३।। मृधेनिदाघघर्मांशु घट
दर्शंपश्यंतितंपरे। सपुनःपार्थसंचारंसंचरत्यवनीपतिः।। ४।। एतद्विलोपेक्रिपूसमो राम
७९

समासगा एतयोर्द्वयोर्द्धर्मवाद्योः।। उदा। सवितावधवतिविधुरपिसवितरतितथादिनंतियामिन्यः
। यामिनयतिदिनानिचसुखदुःखवशीकृतेमनसि।। ५।। परिपंथिमनोराज्यशतैरपिदुराक
। यामिनयतिदिनानिचसुखदुःखवशीकृतेमनसि।। ६।। धर्मोपमानयोर्लोपेवृत्तौवाक्येचदृश्यते।
म।। सपरायप्रवृत्तोसौराजतेराजकुंजरः।। ७।। धर्मोपमानयोर्लोपेवृत्तौवाक्येचदृश्यते।
उदा। ढुंढुलंतोमरीहसिकंटअकलिआइंकेअइवराआइं। मालइकुसुमसरिच्छंभमरभमंतो
णपाविहसि।। ८।। कुसुमेनसममितिपाठेवाक्यगा।। क्यचिवाचकउपमेयासे। आसेनिरासेउ
दा।। अरातिविक्रमालोकविकस्वरविलोचनः। कृपाणोदग्रदोर्दंडःससहस्रायुधीयति।
७।। अत्रात्मोपमेयः।। त्रिलोपेवसमासगा। त्रयाणांवादिधर्मोपमानानांलोपे। उदाहरणं
निहुतावलोकनाललितविलासचित्त...विलुब्धविग्रह।। स्मरशरविसरा चितांत
रामृगनयनाहरतेमुनेर्मनः।। ८।। अत्रसपदिमुपमानेस्यादिनायद्वासमासलोपेभ
२

कप्र.
८.

वतंतदउदाक्रूरस्याचारस्यायःशूलतया ध्वंसादयःशूलेनाविद्धतियःसअयश्च
लिकः। इत्यतिशयोक्तिर्नतु क्रूराचारोपमेयतेक्षापधर्मेवाद्यीनां लोपेत्रिलोपेयमुपमा। एवमेकोन
विंशतिर्लुप्ताः पूर्णाभिः सह पंचविंशतिः। अनयैनेव राज्यश्रीर्दैन्येनेव मनस्विता। मम्लौ साथवि
षादेन पद्मिनीव हिमांभसा॥८॥ इह समिन्नेसाधारणोधर्मः। ज्योत्स्नेव नयनानंदः सुरेव मदका
रणं। प्रभुतेव समाकृष्टसर्वलोकानितंबिनी॥९॥ इति भिन्नेवा तस्मिन्नेकस्यैव बहूपमानोपा
दाने मालोपमा। यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे। अनवरतकनक
वितरणजललवभृतकरतरंगितार्थितते। भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्ति
रतिविमला॥१०॥ मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावयुता। तस्य सभेव जयश्रीः शक्या
जेतुं नृपस्य न परेषां॥ इत्यादिकारसनोपमा च न लक्षिता। एवं विधवैचित्र्यसहस्रसंभवादुक्त राम

भेदानतिक्रमाच्च। उपमानोपमेयत्वे एकस्यैवैकवाक्यगे। अनन्वयः। उपमानांतरसंबंधाभा
वादनन्वयः। उदा। न केवलं भाति नितांतकांतिर्नितंबिनी सेव नितंबिनी वा। यावद्विलासायुधला
स्यवासास्तेतद्विलासा इव तद्विलासाः॥१२॥ विपर्यासउपमेयोपमानयोः। तयोरुपमानोपमेययो
र्विपर्यासपरिवृत्तिरर्थाद्वाक्यद्वये इतरोपमानव्यवच्छेदपरा। उपमेयेनउपमाइत्युपमेयोपमा। उ
दा। कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः। धरणीव धृतिर्धृतिरिव धरणी
सततं विभाति बत यस्य॥१३॥ संभावनमथोत्प्रेक्षाप्रकृतस्य समेन यत्। समेनउपमानेन। उदा।
उन्मेषं यो मम न सहते जातिवैरी निशायामिंदोरिंदीवरदलदृशा तस्य सौंदर्यदर्पः। नी
तः शांतिं प्रसभमनया वक्त्रकांत्येति हर्षाल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः
॥१४॥ लिंपतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता
॥१५॥ [redacted] इत्यादौ व्याप्यनादिलेपनादिरूपतया संभावित

क३ तथा ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः। भेदोक्तौ यथा। अयं मार्त्तण्डः किं स खलु तुरगैः सप्त
८१ भिरितः कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम्। कृतान्तः किं साक्षान्महिषवहनो सावि
ति विरसमालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥१४॥ भेदोक्तौ विसंदेहेन केवलमुपति
ष्ठ्यग नौया वक्ति श्रुयान्तो पि संदेहः स्वीकृतः। यथा। इन्दुः किं क्व कलङ्कः सरसिजमेतत् किमम्बु
८५ कुत्र गतम्। ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥१५॥ किं च निश्चयगर्भ इव
नात्र निश्चयः प्रतीयते इत्युपेक्षितो भेदोऽत्र न। तदनुक्तौ यथा। अस्याः सर्गविधौ प्रजापति
रभूच्चन्द्रो नु कान्तिप्रदः शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं
नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥१६॥ तद्रूपकमभे
दो य उपमानोपमेययोः ॥ अतिसाम्यादनपह्नुतभेदयोरभेदः। समस्तवस्तुविषयं श्रौता आ
रोपिता यदा। आरोपविषया इव आरोप्यमाणा यदा शब्दोपात्तास्तदा समस्तानि वस्तूनि वि
षयोऽस्येति समस्त[redacted]वस्तुविषयम्। आरोपिता इति बहुवचनमविवक्षितम्। यथा। रा.प्र ८१

८१

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयं।
द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन।
अत्र पादत्रये अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्ती
ति न संकरशङ्का न कार्या। श्रौता आर्थाश्च ये तस्मिन्नेकदेशविवर्ति तत्। केचिदारो
प्यमाणाः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेया इत्येकदेशविवर्त्तनादेकदेशविवर्त्ति।
यथा। जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअं। रससंमुही वि सहसा परम्मुही होइ रि
उसेणा ॥१॥ अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्। मण्डलाग्रलताया नायिका
त्वं रिपुसेनायाश्च प्रतिनायिकात्वमर्थसामर्थ्यादवसीयत इत्येकदेशविवृति[redacted]
[redacted] णावर्त्तनादेकदेशविवर्त्ति। साङ्गमेतत् रा

भि२ प१

कप्र उक्तं द्विभेदं सावयवमृनिरंगं तु अंगं यथा । तुरंगीवांगानिर्हि भितयति गात ध्व निमुत्तरंवाकांतोदन्तो
८२ श्रातमपि पुनः प्रश्नपतियत । अनिंद्रयचान्तः स्वपितितदृहोवे ध्य नवां प्रहसोस्पाः संकुहृदि भि२
मनसिजः प्रेमलतिकां । मालानुपूर्व वच । नालोपमायामिवे कस्मिन्निह बहव आरोपिताः य
थास्तौंदर्यस्पतरंगिराणातरुणिमोत्कर्षस्पहर्षोडुंकांतेः कामेराकर्णन मिरहसा मुल्लासनावा
सभूः । विद्यावक्रगिरांविधेरनवधि प्रावीराय साक्षाक्रियावाराणः पंचशिलामुखस्य
ललनाचूडामणिः सा प्रिया ॥१॥ लियतारोपपरोंपायः स्यादारोपः परस्पयः । तत्संपरितं श्लिष्टे
वा के ने द्भाजिवा । विद्वन्मनसङ्सवैरिकमलासंकोचदीक्षगुनदुर्गमार्गगानील लोहि
तसमित्स्वीकारवैश्वानर ॥ समसप्रीतिविधानदक्षविजयप्राग्भावभीमप्रभोसाम्राज्यंवर राम
वीरवत्सरशृत्तं वैरिंचिमुद्वैः क्रियाः ॥१॥ अत्रमानसमेवमानसम् । कमलायाः संकोचएव । ८२

कमलानामसंकोचः दुर्गाणामममार्गमेव दुर्गयामार्गणाम् । समितां स्वीकार एव समिधांस्वी
कारः । सत्ये प्रीतिरेव सत्यामप्रीतिः । विजयः परपराभव एव विजयोर्जुनः । एवमारोपणानि
न६ भिन्नो हि साहे रारोपः यद्यपि शाद्वार्थालंकारोयमिपुरस्कं वस्पलेय । तथापि प्रसिद्धनुरोधा
दत्रोक्तः । एकदेशविवर्तीहृमन्यैरभिधीयते । मेदूनाजि यथा आलानं जयकुंजरस्पदर्पदांसे
६५ तुर्विपद्वारिधेः पूर्वाद्रिः करवालचंद्रमसोली पधानं श्रियः । संग्राम मृतसागरप्रमथ
नक्रीडाविधौमंदरोराजन्राजति वीरवैरिवनिता वैधव्य दस्ते भुजः ॥ अत्रजयादि
अशब्दवाच्चकुंजरत्वाद्यारोपे भुजस्यालानत्वाद्यारोपो युज्यते । अतो किकमहलोकेप्रका
ज शितागत्र्य त्यूयते देवसदृशभृत्कास्त्वनकैर्नवौ [redacted] निरवधिवनिता श्रयं यस्य स्फुरित
मनिवार्त्तिति कौतुकप्रपंचस्य । प्रथमइह भवारस कूर्ममूर्त्तिर्जयतिचतुर्दशलोकवादि

काप्र
८३

केंदुः॥७॥ इति च मालारूपकमपि परं परितं दृष्टव्यम्॥ किसलयकरैर्लतानां करकमलैः का-
मिनीं मनो जयति। नलिनीनां कमलमुखैर्मुखेंदुभिर्योषितां मदनः॥७॥ इत्यादौ रसनारूप-
केन वैचित्र्यवत्त्विति न लक्षितम्॥ प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः॥ उपमेयम-
सत्यं कृत्वा उपमानं सत्यतया यत्स्थाप्यते सा त्वपह्नुतिः॥ अवाप्तः प्रागल्भ्यं परिणतरुचः शैल- ५४
तनये कलंको नैवायं विलसति शशांकस्य वपुषि॥ अमुष्येयं मन्ये विगलदमृतस्य-
न्दशिशिरे रतिश्रांता शेते रजनिरमणी गाढमुरसि॥१॥ इत्थं वा। बत सखि कियदेतत्पश्य
वैरं स्मरस्य प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि। उपवनसहकारोद्भासिभृंगच्छ-
लेन प्रतिविशिखमनेनोट्टंकितं कालकूटः॥२॥ अत्र हि न सभृंगाः सहकाराः राम
पितुरसं कालकूटाः शरा इति प्रतीतिः॥ एवं वा। अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृ- ८३

शःस्मरः सर्वप्लुष्टः पृथुजघनभागे निपतितः यदंगांगाराणां प्रशमपिशुना नाभि-
कुहरे शिखा [illegible] धूमस्येयं परिणमति रोमावलिवपुः॥१॥ अत्र न रोमावलिर्धूमशिखे-
यं प्रतिपत्तिरेव भियेनं गप्तैरेष्यूहा श्लेषः स वाक्य एकस्मिन् यत्रानेकार्थता भवेत्॥ एकार्थ-
प्रतिपादकानामेव शब्दानां यत्रानेकार्थः स श्लेषः॥ उदा॰॥ उदयमयते दिग्मालिन्यं निराकुरुते-
तरां नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः॥ रचयतितरां स्वैराचारप्रवर्तनकर्तनं ब-
त बत लसत्तेजःपुंजो विभाति विभाकरः॥२॥ अत्राभिधाया अनियंत्रणाद्द्वावप्यर्कनृपौ वाच्यौ
परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः॥ प्रकृतार्थप्रतिपादकेन वाक्येन श्लिष्टविशेषणमाहात्म्या-
न्न तु विशेष्यस्य सामर्थ्यादपि यदप्रकृतस्यार्थस्याभिधानं स समासेन संक्षेपेणार्थद्वयस्य
कथनात् समासोक्तिः॥ उदा॰॥ लहिऊण तुह बाहुफंसं जीए स को वि उल्लासो॥ जयलच्छी तुह वि-

कु॰ प्र॰ विरहेणाहो जलाडुब्बलानां सा ॥ ७ ॥ अत्र जयलक्ष्मीशब्दस्य केवलकांतावाचकत्वेन स्त्रि

निदर्शना अप्रमेकवस्तुसंबंधायुपमापरिकल्पक ॥ निदर्शनं दृष्टांतकरणा शास्त्रदानके

८४ सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ ६ ॥

अत्रोडुपेन सागरतरणम् ॥ मितमत्या सूर्यवंशवर्णनमिव उपमायां अप्रवपर्यवस्प

ति ॥ अथवा । उदयति वितनोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् । वह

ति गिरिरयं विलंबिघंटाद्वयपरिवारितवारणेंद्रलीलाम् ॥ अत्र कथमन्यस्य ली

लामन्यो वहति सुपमा यां पर्यवसानम् ॥ दोर्भ्यां तितीर्षति तरंगवतीभुजंगमादा

दातुमिच्छति करे हरिणांकबिंबम् । मेरुं लिलंघयिषति ध्रुवमेष देव यस्ते गुणान्

गदितुमुद्यममादधाति ॥ ९ ॥ इमादौ मालारूपाप्येषा ॥ इष्ट्वा ॥ स्वस्वरान ८४

हेत्वन्वयस्यैक्तिः क्रियायैव तु सापरा ॥ क्रिययैव तु स्वस्वरूपस्वकारणयोः संबंधो यद्यवगम्यते सापरा

निदर्शना ॥ यथा । उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् । शैलशेखरगतो दृषत्कणा

श्चारुमारुतधुतः पतत्यधः ॥ ५ ॥ अत्र पातक्रियया पतनस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य

कारणस्य च संबंधः ख्याप्यते ॥ अप्रस्तुतप्रशंसायाः सा सैव प्रस्तुताश्रया ॥ अत्राप्रकरणिकस्या

भिधानेन प्राकरणिकस्याक्षेपो ऽप्रस्तुतप्रशंसा सा च कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति

ति तदन्यस्य वचस्तुल्ये तुल्यस्येति च पंचधा ॥ १ ॥ नंदन्यस्य कारणादेः । क्रमेणोदाहृ ॥ याताः किं

न मिलंति सुंदरि पुनश्चिंता त्वया मत्कृते नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि । ल

ज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचि

१

तः॥३॥ अत्रप्रश्नानाक्षिप्तमिति तिष्ठत्वोसीति कार्ये पृष्टे कारणमभिहितम्॥ राजन्राजसुता न पाठयति मां
देव्योपि तूष्णीं स्थिताः कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते इत्थं नाथ शुकस्तवा
रिभवने मुक्तोध्वगैः पंजराच्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते॥४॥ अत्रप्रस्तु
नोद्यंतं मत्संज्ञाता सहसैव हृदयः पलाय्य गता इति कारणे प्रस्तुते कार्यमुक्तम्॥ एतत्तस्य मुख
क्रियत्क्रमदिनापत्रैकरां वारिणायन्मुक्तामणिरिसमस्तासजडः स्मरावन्यद्स्मादपि॥ अगुल्म
ग्रलघुक्रियाप्रविलयिन्यादियामातिशनैः कुत्रोकुत्रीयगतोमम त्यनुदिनं नितरां [illegible] तिनान्तःअ
चाप॥ अत्राख्यानेजडानां महद्भसंभावनाभावतीति सामान्ये प्रस्तुते विशेषः कथितः॥ सुहृद्व
धूवाष्पजलप्रमार्जनं करोति वैरिप्रतिपार्थिवनेनयः॥ सएवपूज्यः सपुमान्सनीतिमान्सुजाविः
तंतस्य समाजनं श्रियः॥६॥ अत्रसक्षेनिहत्यनरकासुरवधूनां यदिदुःखंशमयासि तदात्वमेव श्लाघ्यान

८५

इति विशेषप्रस्तुतिसामान्यमुदितम्॥ तुल्येप्रस्तुते तुल्याभिधाने त्रयःप्रकाराः श्लेषःसमासोक्तिः सा ८८२
दृश्यमात्रं वा तुल्यात्तस्या प्रपेहेतुः॥ कमेरीणदा॥ पुंस्त्वादपि प्रविचलेद्यदि यद्यधोपि यायाद्यदि
प्रणयेनेन महानपि स्यात्॥ अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषोत्त
मेन॥७॥ येनास्यभ्युदितेन चंद्रगमितः क्लान्तिं रवौ तत्रते युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रह
णं रोनेतदनुस्थितं यदि ततः किंलज्जसे नो मनागस्त्वेवं जडधाम तानुभवतो यद्व्योम्निविस्फूर्जसि॥८॥
आदाय वारि परितः सरितां मुखेभ्यः किं तावदर्जितमनेन दुरर्णवेन॥ क्षारीकृतंच वडवावदने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च॥९॥ इयं काचिद्विद्याध्येप्रतीयमानार्थानध्यारोपेणोद्भवति॥ यथा
॥ अर्धेरं मः रुढागितभुवनाभोगपातालकुक्षेः पोतोपायाइहहि बहवो लंघनेपि क्रमन्तो आहोरि
क्तः कथमपि भवेदेष दैवाच्चदानीं को नाम स्यादवटकुहरालोकनेप्यस्य कल्पः॥१०॥ काचिद्विद्याध्यारोपरो

२
कप्र॰ नैवा। यथा। कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्य
ते वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न छायापि परोपकारकरणी मार्गस्थितस्यापि मे॥ १॥
क्वचित्त्वंशेऽध्यारोपेण। यथा। सौंदर्यरसनाविपर्ययविधिस्तत्कस्मै योऽश्वापलं दृष्टिः सा मदविस्मृतस्व
परत्रि किं भूयसोक्तेन वा। सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसावन्तःशून्यकरो निषेव्यत इ
ति भ्रातः क एष ग्रहः॥ २॥ अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्यासेवनेन हेतुः कर्णचापलं तु
हेतुः। मदः प्रस्तुतसेवने निमित्तं। निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्। प्रस्तुतस्य यदन्यत्वं यद्यर्थो
क्तौ च कल्पनं॥ १२॥ कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः। विज्ञेयातिशयोक्तिः सा। उपमानेनान्तर्निगी
र्णस्योपमेयस्य यदध्यवसानं सैका। कमलमनंभसि कमले च कुवलये तानि कनकलतिकायां। सा
च सुकुमारसुभगेत्युत्पातपरंपरा केयं॥ २॥ अत्र मुखादि कमलादिरूपतयाध्यवसितं॥ यच्चतदे राम.

देवान्यत्वेनाध्यवसीयते सापरा। यथा। अन्नं ललहत्तणअं अन्नं वियका वि वत्तणच्छाआ। सामा सामान्नप
आवइणो रेह च्चिअ न होइ॥ ३॥ यद्यर्थस्य यदिशब्देन चेच्छब्देन वा उक्तौ यत्कल्पनमर्थादसंभविनोऽर्थस्य
सा तृतीया। यथा। राकायामकलंकं चेदमृतांशोर्भवेद्वपुः। तस्या मुखं तदा साम्यपराभवमवाप्नुयात्॥ ४॥ का
रणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी। यथा। हृदयमधिष्ठितमादौ मालत्याः कुसुमचा
पबाणेन। चरमं रमणीवल्लभ लोचनविषयं त्वया भजता॥ ५॥ प्रतिवस्तूपमा तु सा॥ सामान्यस्य द्वि
रेकस्य यत्र वाक्यद्वये स्थितिः। साधारणो धर्म उपमेयवाक्ये च उपमानवाक्ये च कथितपदत्वस्य दु
ष्टतया निहितत्वाच्छब्दभेदेन यदुपादीयते सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा। यथा। दे
वीभावं गमिता परिवारपदं कथं भजत्येषा। न खलु परिभोगयोग्यं दैवतमुद्रांकितं रत्नं॥ ६॥ यदि
दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः। लवणमंबु सदैव महोदधेः प्रकृतिरेव सताम

३

२ काप्र. विषादिताऽसादिमात्माप्रतिवस्तूपमादृष्टान्ता। एवमन्यत्राप्यनुसर्त्तव्यम्। दृष्टान्तः पुनरेतेषां सर्वेषां
प्रतिबिंबनम्। एतेषां साधारणधर्मादीनां दृष्टान्तेति स्फुयोयत्र स दृष्टान्तः। यथा। त्वयि दृष्ट एव तस्या नि
र्वाति मनो मनोभवज्वलितम्। आलोके हि हिमांशो विकसति कुमुद्वती।। एष साधर्म्येण वैधर्म्येण तु। तव उ.उं.२३
हे विसाहसकर्मशर्मणः पाणिंन्नपाणां तिकनानि नाषितः। मद्यः परेषां विशरारुता मगुद्दधत्पवाते स्थिरता
हि पांसवः।।५।। सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्। सैव क्रियासु बह्वीषु ...कारकस्येति दीपक
म्।। प्राकरणिकाप्राकरणिकानामर्थानामर्थादुपमानोपमेयानां धर्मः क्रियादिरेकवारमेव यदुपादीयते
तदेकस्यैव समस्तवाक्यदीपनाद्दीपकम्। यथा। किवीणां णांधाणीणं आ णांकं णामाणां केसराइ सिहाणां
कुलवालिआणां थणा कुत्तो छिप्पंति अमुआणं।।१।। कस्यचिद्बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम्। यथा
।स्विद्यति वेद्यति कूणति विवलति निमिषति विलोकयति तिर्यक्। अन्तर्नन्दति चुंबितुमिच्छति न राग.

का २२

६२

मुतारं २

वपरिणयावधूः शयने।। मालादीपकमाद्यं चेद्यथोत्तरगुणावहम्। तद्वीणापूर्वेणवस्तुनोत्तरवस्तु
प क्रियते तन्मालादीपकम्। यथा। संग्रामांगणमागतेन भवता चापे समारोपिते सप्राक्षेप
रिपं धियोधानिवहे सांमुख्यमासादितम्। कोदंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन
न त्वंन्नृपते त्वपासितयशस्तेनापि लोकत्रयम्। नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता।
नियतानां प्राकरणिकानामेव वा अप्राकरणिकानामेव वा। क्रमेणोदा। पांडु क्षामं वदनं हृदयं स वा५
रसं तवालसं च वपुः। आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः।। कुमुदकमलनीलनी
रजालिर्ललितविलासजुषोर्दृशोः पुरः का। अमृतममृतरश्मिरंबुजन्म प्रतिहतमेकपदे तवा
ननस्य।। उपमानाद्यदन्यस्य व्यतिरेकः स एव सः। अन्यस्योपमेयस्य व्यतिरेक आधिक्यं शब्दा
रणः क्षीणः क्षीणोपि शशी भूयो भूयोपि वर्द्धते सत्यं। विरम प्रसीद सुंदरि यौवनमनिवर्ति यातं तु।।

४

कप्र इत्यादावुपमानस्योपमेयादाधिक्यमितिय क्तेनचिदुक्तं तदयुक्तम्॥ अत्र यौवनगतास्थैर्यस्याधि
क्यं हि विपक्षितम्। हि सोत्कर्षावनुक्तौ नात्र येसाम्ये निर्धि दृते। २। शब्दार्थाभ्यां नाम यथा श्लिष्टे स्थे षेण्ड २२
त्रिरमृतन। व्यतिरेकस्य हेतुरुपमेयगतमुत्कर्षनिमित्तमुपमानगतं निकर्षकारणं तयोरुक्तिः एक
तरस्य द्वयोर्वानुक्तिरित्यनुक्तित्रयम्। एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्दे न प्रतिपादिते अ
र्थेन च क्रमेण त्रयो द्वौ चत्वार एव भेदाः। आक्षिप्ते चौपम्ये तावन्त एवातः द्वादश। एते श्लेषे पि भवंती
तियत्तुविंशतिः क्रमेणोदा। असिमात्रसहायस्य प्रभूतारिपराभवो अन्यतुच्छजनस्येव न स्म
योस्य महाधृतेः॥ ६ अत्रैवतुच्छेति महाधृतेरित्यनयोः पर्याये णायुगपद्वा अनुपादानेन्यद्भेद
त्रयम्। एवमन्येष्वपि द्रष्टव्यम्। अत्र वशेहृस्यसद्भावाछान्दमौपम्यम्। असिमात्रसहायोपि
प्रभूतारिपराभवो नैवान्यतुच्छजनवत्सगर्वोयं धृतेर्निधिः। ७। तुल्यार्थे त्रवतिरित्यार्थमौ राम

८८

पम्यम्। इयं सुनयना दासीकृततामरसश्रिया। आननेनाकलंकेन जयतींदुं कलंकितम्॥ ८। अत्रेवा
पम्यम्। इयं सुनयना दासीकृततामरसश्रिया। जितेंद्रियतया सम्यग्विद्यावृद्धनिषेविणः [redacted]
दितुल्यादिपदविरहे आक्षिप्ते चोपमा। जितेंद्रियतया सम्यग्विद्यावृद्धनिषेविणः [redacted]
[redacted] अतिगाढगुणस्यास्य नाब्जवद्भंगुरा गुणाः॥ १०। अत्र इवार्थे वतिः। गुणाश्लेष्टः श्लिष्टः। अखंडमं
डलः श्रीमानयं पश्य पृथिवीपतिः। न निशाकरवज्जातु कलावैकल्यमागतः॥ ११। अत्र तुल्यार्थे वतिः। क
लाशब्दः श्लिष्टः। यथा वा हरवन्न विषमदृष्टिर्हरिवन्न विनीतविधृतविततदृष। रविवन्नचातिदुःसह
करतापितभूः कदाचिदसि॥ १२। अत्र तुल्यार्थे वतिः। विषमादयश्च शब्दाः श्लिष्टाः। नितांतप्रतापेन त्रि
यामा मामीलितपद्मा भास्वता तेन भूपेन भास्वानेष विनिर्जितः। १३। अत्र तुल्ये आक्षिप्ते चोपमा। भास्वतेति
वा श्लिष्टः। यथा। स्वच्छात्मतागुणसमुल्लासितेंदुबिंबबिंबप्रभाधरमहत्त्विमहार्घगंधम्॥ १४। यूनामतीव पिबतां रजनीषु यत्र त्रत्क्लोजहारमधुनाननमंगनानां। १५। अत्रेवार्थतुल्यादीनां पदानामभावे पि श्लि

२२

क५ त्वविशेषेणोत्तरार्धे विशेषोपमा प्रतीयते। इयं विजातीयकाश्लिष्टे। क्रियोपम्यस्य च गुणादौ निषेधः संभवे
न्नितेष्वनये वहिशादूषृव्याः। निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया। वक्ष्यमाणोक्तविषयः स आ
क्षेपो द्विधा मतः॥५॥ विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीयार्थस्याशक्यवक्तव्यत्वमतिप्रसिद्धं वा वि
शेषं वक्तुं निषेधोऽयं निषेध इव वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः। क्रमेणोदाहरणा
नि। रे रे हि किं पि कथये विकरणाणि। किं व मरणामि अलमहवा अ वि आरि अकेरत्नं मआणि राही मा
रुणा मणिसंख्ज्योत्स्ना मौक्तिकदाम चंदनरसः शीतांशुकांतद्रवः कर्पूरं कदली मृणालवलयान्यम्भो
जिनीपल्लवाः। अंतर्लीनमना त्वया प्रभवतां तस्याः स्फुलिंगोत्कर व्यापाराय भवंति हंत किमनेनो
क्तेन न ब्रूमहे॥६॥ क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना। हेतुरूपक्रियानिषेधेऽपि तत्फलप्र
काशनं विभावना। कुसुमितलतास्तीक्ष्णरहिताप्यधन्यजमलिकुलैरदृष्टापि। परिवर्तते स्म ~~स्थ~~ लहरीभि
नलिनी

८८

र निरलोलिताप्य(ध्य)घूर्णत सा॥७॥ विशेषोक्तिरखंडेषु कारणेषु फलावचः। मितितेष्वपि कारणेषु कार्यस्या
कथनं विशेषोक्तिः। अनुक्तनिमित्ता उक्तनिमित्ता अचिंत्यनिमित्ता च। क्रमेणोदाहरणानि। निद्रानिवृत्ता
वुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते। श्लथीकृताश्लेषरसे भुजंगे चचाल नालिंगनतोऽङ्गना सा॥८॥ कर्पू ग२
र इव दग्धोऽपि शक्तिमान् यो जने जने। नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे॥९॥ स एकस्त्रीणि जयति कु जगंति४ कु४
सुमायुधः। हरतापि तनुं यस्य शंभुना न हृतं बलम्॥१०॥ यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः। यथा
। एकस्त्रिधा वससि चेतसि चित्रमत्र देव द्विषां च विदुषां च मृगीदृशां च। ~~तापं च~~। तापं च संमदरसं च रतिं च
पुष्णन् शौर्योष्मणा च विनयेन च लीलया च॥११॥ सामान्यं वा विशेषो वा तदन्येन समर्थ्यते। यत्र सोऽर्थांत
रन्यासः साधर्म्येणेतरेण वा॥१२॥ साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत्र समर्थ्यते विशेषो वा
सामान्येन सोऽर्थान्तरन्यासः। क्रमेणोदाहरणानि। निजदोषावृतमनसामतिसुंदरमेवभाति विपरी

६
क७ रीतम्॥ पश्यति प्रियोपहतः शशिसुन्दरं शरखमपि पातम्॥१॥ सुसितवसनालंकारायां कदाचन कौमुदी
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः। तदनु भवतः कीर्तिः केनाप्यगीयत येन सा प्रियगृहं गता
न्मुक्ताशंकं क नाभिसृत प्रदः॥३॥ गुणानां वैदाराल्यादुरिधुर्यैर्नियुज्यते। असंजातकिणस्कंधः
सुखं स्वपिति गौर्गली॥४॥ अहो हि मे बहुपराद्धमायुषा यत्प्रियं वाच्यमिदं मयेदृशम्। त एव धन्याः
सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः॥५॥ विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः। वस्तुनस्तेन अ धे५
विरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः। जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः। क्रि
याद्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश॥६॥ क्रमेणोदाहरणानि। अभिनवनलिनीकिसलयमृणालवल
यादि द्रवदहनराशिरस्य सुभग कुरंगदृशो स्या विधिवशतस्त्वद्वियोगपविपाते। गिरयोप्य[illegible]न्नतियु
जो मरुदप्यचलोब्धयोप्यगंभीराः। विश्वंभराप्यतिलघुर्नरनाथतवांतिके नियतम्॥७॥ येषांकं राम
तु२

९०

गृहपरिग्रहप्रणयिनीं संप्राप्य धाराधरस्तीव्रांशुः सोप्यनुरज्यते च किमपि स्नेहं परां प्रीतिं वा। तेषां संगरसंग
सक्तमनसां राज्ञां त्वया भूपते पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम्॥३॥ सृजति च जगदि
दमवति च संहरति च हेलयैव यो नियतम्। अवसरवशतः शफरो जनार्दनः सोपि चित्रमिदम्॥४॥ सततं
मुसलासक्ता बहुतरगृहकर्मघटनया नृपते। द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः
॥५॥ पेशलमपि खलवचनं दहतितरां मानसं सुतत्त्वविदाम्। परुषमपि सुजनवाक्यं मलयजरसवत्प्र
मोदयति॥६॥ क्रौंचाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणानर्गलशातपाते। अभून्नवांभोजदलाभिजातः
स भार्गवः सत्यमपूर्वसर्गः॥७॥ परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो
न गतवान्। विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यंतर्जडयति च तापं च कुरुते॥८॥ अयं
वारामेको निलय इति रत्नाकर इति श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः। क एवं जाना

कप्र नेनिजकरपुटी[redacted]कोटरगतं त्कणादेनं तास्पन्निमिमकरमापास्यतिमुनिः॥३॥समदमत्तं गजमदत्तलति
स्पंदन्तरं गिरणपरिष्वंगाल्ल।द्विति तिलकलयितटमु विग्रं करजूटापगापिकालिंदी॥१स्यमावोक्ति
[redacted] द्विजादेः स्वक्रिया[redacted]पवर्गी रूर
नष्टं स्वयोत्कृष्टकाश्रययोन्हूपंवर्गाः संस्थानं च।उदाहरणम्।पश्चात्संक्षिप्य सार्यत्रिकनतिविततद्रा
घयित्वांगमुद्दैराम ज्याभुग्नकंठो मुखमुरसिसटाधूलिधूम्रां विधूय।घासग्रासाभिलाषादनव
रत चलत्प्रोथतुंडस्तुरंगो मंदं शद्वायमानो विलिखति शयनादुत्थितः क्ष्मांखुरेण॥४॥व्याजस्तुतिमु
खेनिंदास्तुतिर्वा हृष्टिरन्यथा।व्याजरूपाव्याजेन वास्तुतिः[redacted]॥क्रमेणोदाहरणानि।हित्वा त्वामुप
रोधवंध्यमनसां मन्येन मौलिः परो लज्जानं तरे राणनर मामन्यत्र संदृश्यते।यत्त्यागं तनुते तरांमुखशतैरेस
म्रितायाः श्रियः प्राप्यत्यागकृतावमाननमपिलप्यैव यस्याः स्थितिः॥६॥हे हेलाजितबोधिसत्ववच
सां किं विस्तरैस्तोयधेनास्ति त्वत्सदृशः परः परहितादाने गृहीतव्रतःतट्टष्यसौ व्याजनो[redacted]पाका राम

मजूर

८१

रघट्टनावैमुख्यलब्धायशोभारप्रोद्वहनेकरोषिकृपया साहायकं यन्मरोः॥५॥सा सहोक्तिः सहार्थस्य
वलादेकं द्विवाचकं।एककार्थाभिधायकमपि सहार्थस्य वलाद्वद्वयस्या वगमकं सा सहोक्तिः॥
यथा।सह दिवा ग्रहनिसाहिं दीहरा सासदंडा सह मणि वलयहिं वाहधरागलंति।तुह सुहअविओ
एतीयाउविग्गिरा सहच्युतरा लहुदाएउव्वलाजीविदासा॥१॥अत्रश्वाससदंडादिगतं दीर्घत्वादि शाह्यादि
वसनिशादिगतं सहार्थसामर्थ्यात्प्रतिपाद्यते॥२॥विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः।क्व
चिदशोभनाः क्वचिच्छोभनः।क्रमेणोदाहरणम्।अरुचिर्निशया विनाशशी शशिना सापि विना महत्त्त्र
मः।उभयेन विनामनोभवस्फुरितं नैव चकास्ति कामिनोः॥१॥मृगलोचनया विना विचित्रव्यवहारप्र
तिभाप्रभाप्रगल्भः।अमृतद्युतिसुंदरा[redacted]योयं सुहृदानेन विनानरेंद्रसूनुः॥२॥परिवृत्तिर्विनिमयो योर्थी
नां स्यात्समासमैः।यथेहसिरलंकारः।उदाहरणम्।लताना भेनासामुद्रितकुसुमानां मनहृदयं मनेला

रू२

का.प्र. ८

स्पदत्ताश्रयतिम्रशमामोदमसमशल्कतास्वधन्या नाम्नां हह दृशमादायसहसाददत्याधिव्याधि
न्त्रमिकृत्ति मोहव्यतिकरश्च ॥३॥ अत्र प्रथमेर्द्धे समेनेनममस्यद्वितीयेतु नमेनत्वेनस्य। नानाविध
प्रहरणोर्नृपसंप्रहारेस्वीकृतेदारुणनिनादवतः प्रहाराः हस्तारिवीरविसरेरणावसुधरेयेन निर्विघ्नलंभप
रिरंभविधिर्वितीर्णा ॥१॥ अत्रन्मूनेनोत्कमस्याप्रसक्ताद्वय[illegible]वाः क्रियन्तेभूतभाविनः। तद्भाविकाभू ५४
ताश्चभाविनश्च तिद्वंद्वः। भावः कवेराभिप्रायोत्रास्तीतिभाविकश्च ॥ उदाहरणम् ॥ आसीदंजनमत्रेति
पश्यामितवलोचने। भाविभूषणसंभारांसाक्षात्कुर्वेतवाकृतिम् ॥ ॥ अत्राद्येर्थेभूतस्य द्वितीयेभाविनो
दर्शनम् ॥ काव्यलिंगंहेतोर्वाक्यपदार्थता। यथा। वपुःप्रादुर्भावादनुमितमिदंजन्मनिपुरा पुरारेनप्रा
यःक्वचिदपिभवंतंप्रणतवान्। नमन्मुक्तः संप्रत्यहमतनुरग्रेप्यनतिभाङ्महेशक्षंतव्यंतदिदमपरा
धद्वयमपि ॥ ॥ अनेकपदार्थता। यथा। प्रणयिसखीसलीलपरिहासरसाधिगतेर्ललितशिरीषपु ५
ष्पहननैरपिताम्यतियत्। वपुषिवधायतत्रतवशस्त्रमुपाक्षिपतः पततुशिरस्यकांडयमदंडइवैषभुजः ॥ ॥

५२

एकपदार्थता। यथा। भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं हा सोपानपरंपरां गिरिसुताकान्तालयां
लंकृति। अद्याराधनतोषितेनविभुनायुष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनिमहामोहेनिधीयामहे ॥ ॥ एष्वपराधद्वयेपूर्वापरजन्मनोरनमनं भुजपातेशस्त्रोक्षेपः। महामोहे सुखालोकोच्छेदित्वं यथाक्रमे
मुक्तेर्हेतुः। पर्यायोक्तं विनावाच्यवाचकत्वेनवच्यते। वाच्यवाचकभावव्यतिरिक्तेनावगमव्यापारेणा ५४
यत्प्रतिपादनंतत्पर्यायेणभंग्यंतरेणकथनात्पर्यायोक्तम्। उदाहरणम्। यंप्रेक्ष्यचिरमूढापितिवासप्राप्तिहीन
मदेनैस[illegible]वणमुरवि मानेनहृदयेहरेः ॥ अत्रैरावणशक्रौमदमानमुक्तौजातावितिव्यंग्यमपिशब्देनोच्य
ते। तेनचयदेवोच्यतेतदेवव्यंग्यम्। यथातुव्यंग्यंनतथोच्यते। यथागविक्षुक्षेचलतिदृशेगोः श्रुत्काश्वलनानि
विकल्पोयदेवहस्तंतदेवविकल्पयतिनतुयथादृष्टंतथा। यतः अभिन्नासंसृष्टत्वेनदृष्टंभेदसंसर्गाभ्यांविकल्प
यति। उदात्तंवस्तुनः संपत्। संपत्समृद्धियोगोयथा। मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रा
तः प्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाः। दूराद्दाडिमबीजशंकितधियः कर्षंति केलीशुकाः यद्वि

रू

उ न

कप्र. रुवनेषु भोजनृपते स्तत्यागलीलायितम्।महतां चोपलक्षणम्।संपलक्षणमंगभाव अर्थादुपलक्षणं।

२र्थे ये मुदाहरणम्।न दिद्मनरापप्यस्मिन्नुदुरे रथयवचतानुपालनव्यसनी।निवसबाहुसहायस्य कारीर्द

दृष्टंराम:।।४।।नचाज्ञावीरोरस:।तस्यैहांगत्वात्।नसिद्धिहेतौ विकस्मिन्नयवान्यन्न स्कारेणचेत्।समुच्चयोस्तो।

तस्य प्रस्तुतस्य कार्यस्यैकस्मिन्साधके स्थिते साधकांतराणि यत्र संभवंति स समुच्चयः।दुर्वाराः स्मरमा

लु र्गणाः प्रियतमो दूरे मनोत्युत्सुकं गाढं प्रेम नवं वयोतिकठिनाः प्राणाः कुलं निर्मलम्।स्त्रीत्वं धैर्यविरोधि ठ

मन्मथसुहृत्कालः कृतांतोक्षमो नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः।।१।।अत्र विरहासहत्वं

स्मरमार्गणा एव कुर्वंति तदुपरि प्रियतमदूरस्थित्याद्युपात्तम्।एष एव समुच्चयः सद्योगे असद्योगे सदसद्

योगे च पर्यवस्यतीति न पृथग्लक्ष्यते।यथा।।कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतिशालिनी भुजबलम

१लं लं स्फीता लक्ष्मीः प्रभुत्वमखंडितम्।प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो व्रजति सुतरां दर्पं राजंस्त राग

एव ते वांकुशाः।।२।।अत्र सतां योगात्।।दुष्कोदाहरणे त्वसतां योग।।३।।दिवसधूसरो गलितयौवना का

५२

मिनी सरो विगतवारिज मुखमनक्षरं स्वाकृतेः।प्रभुर्धनपरायणः सततदुर्गतः सज्जनो नृपांगणगतः खलो मन

सि सप्त शल्यानि मे।।४।।अत्र शशी निधुसरेशल्यःश्शल्यांतराणि।तेषां मनाशो भनयोगः।सन्नत्वा युगपद्धाणा क्रि

याः गुणौ च क्रियेच [redacted] गुणा क्रियाः क्रमेणोदाहरणानि।विदलितसकलारिकुलं तव बलमिदमन

वदातमुविमलं च।प्रखलमुखानि नराधिप मलिनानि च तानि जातानि [redacted]।।५।।अयमेकपदे तया वियो

गः प्रियया चोपनतः सुदुःसहो मे।नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः।।६।।कलुषं च तवाहि

त तेष्वकस्मात्सितपंकेरुहसोदरश्रि चक्षुः।पतितं च महीपतींद्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः।।७।।धु

नोति चासिं तनुते च कीर्तिमित्यादेः क्रमादुदाहरणानि ज्ञेयानि।सर्वधुवादाश्वसुराः सुरालये इसा

देश्यदर्शनाद्यधिकरणाइति एकस्मिन्देशइति च न वाच्यम्।एवं क्रमेणानेकस्मिन्पर्यायः।एकं वस्तु क्र

मेणानेकस्मिन्भवति क्रियते वा य स पर्यायः।क्रमेणोदाहरणम्।श्रोणीबंधस्त्यजति तनुतां सेवते मध्य

भागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम्।धत्ते वक्षःकुचसचिवतामद्वितीयं तु वक्त्रं तद्गा

कप्र. १ त्रारांगुणा विनिमयः कल्पितो यौवनेन। ७। यथा वा। नन्वा श्रय स्थितिरियं तव कालकूटकेनोत्तरोत्तरवि
शिष्टपदोपदिष्टा। प्रागर्णावस्य हृदये वृषलक्ष्मणो वा कंठे धुनाव ससि वा विपुलः खलानाम्। यथा वा। वि
बोष्ठाग्रवरागस्ते तत्त्विपूर्वमहं दृश्यते। अधुना हृदयेप्येष मृगशावत्रिलक्ष्यते। रागस्य [redacted] वस्तुनो भे
देप्येकतयाध्यवसितत्वादेकत्वमविरुद्धम्। तथा। तत्ताणा सिरिसहो अरर अरणाहरणा म्मि हि अत्र
न्नक्करसम्। बिंबाहरेपि आराणा वेसि अकुसुमबाणोनां। ८। अन्यस्त [redacted] न्यथा अनेकमेकस्मिन् क्रमे थाः
णाभवति क्रियते वा यत्सान्यः। क्रमेणोदाहरणम्। मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं
पृथु व्यनक्ति। अथ [redacted] कथयति मोहहेतुमंतर्गतमिव हालहलं विषं तदेव। १। तत्र हंततनिन्निमन्दि
रभिदं नष्टावकाशं दिवः साधे नुर्जरतीनदृतिकरिणामेतां घनानाघरोः। संनद्धे मुनिलध्वनिः कत
मिदं संगीतकं येषितानां मा श्रुय दिवसेर्द्धितो य [redacted] नियता न्नामिं परां प्रापिता। १। अत्रैकस्यै वहानो
पादानयोरविवक्षितत्वान्नपरिहृतिः। अनुमानं तदुक्तं यत्साध्य साधनयोर्वचः। पक्षधर्मान्वयाः

५ व्यतिरेकत्वेन वित्रपोहेतुः साधनेनाधूमेन रापयोगव्यवच्छेदोव्यापकस्य साध्यं यथा। यत्रैतालहरी चक्षु
चलदृशो व्यापारयतिभ्रूवं तत्रैव प्रपतंति संततममी मर्मस्पृशो मार्गणाः। तच्चक्रीकृतचापमंचितशरप्रेंख
त्करः क्रोधनो धावत्यग्रत एव शासनधरः सत्यं तदासां स्मरः। १। साध्यसाधनयोः पौर्वापर्यविक
ल्पनेन किं चिद्वैचित्र्यमिति तत्र न दर्शितम्। विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः। अथोद्दिशेष्यस्या
उदाहरणम्। महोजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः। न संहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वांछंत्यसुभिः समीहितम्। २। यद्यप्यपुष्टार्थस्य दोषताभिधानान्निराकरणेन पुष्टार्थस्य स्वी
कारः कृतः। तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलंकारमध्ये गणितः। ११६।
व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम्। निगूढमपि वस्तुनो रूपं कथमपि प्रविभिन्नं केनापि व्यपदेशेन य
दपह्नुयते सा व्याजोक्तिः। न चैषापह्नुतिः। प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासंभवात्। उदाहरणम्। शैलें

रू१

कप्र· ११ इप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लसद्रोमांचादिविसंष्ठुलाखिलविधिव्यासंगभंगाकुलः। ह्राशैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं शैलांतःपुरमातृमंडलगणैर्दृष्टोवताद्वः शिवः ॥११॥ अत्र पुलककंपयोः सात्त्विकत्वेन तयोः प्रस्तौ शैत्यस्य कारणतया प्रकाशितत्वाद् पलपितस्वरूपो व्याजोक्तिं प्रयोजयतः। किं चित्स्वरूपं मयपरूपं वा कथितं तथा प्रकल्प्यते ता२

तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥१॥ प्रमाणांतरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनांतराभावात्

१ सदृग्वस्त्वंतरव्यवच्छेदाय पर्यवस्यति सा भवेत्परिसंख्या। अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टं। तथा

व्यवच्छेद्यमानस्य प्रतीयमानता वाच्यत्वं वेति चत्वारोस्य भेदाः। क्रमेणोदाहरणानि। किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः किमेकांते ध्येयं चरणयुगलं कौस्तुभभृतः। किमाराध्यं पुण्यं किमभिलषणीयं च करुणा यदासक्त्या

चेतो निरवधिविमुक्त्यै प्रभवति ॥२॥ किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः। किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकं ॥३॥ कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते। काठि

न्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥४॥ भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे। चिंता यशसि न वपुषि श्री

९५

पुषि प्रायः परिदृश्यते महतां ॥५॥ पूर्वस्य पूर्वस्यापरापरस्य हेतुत्वे तद्द्विकारणमाला स्यात्। उत्तरमुत्तरं प्रति

यथोत्तरं। उदाहरणं। जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते। गुणप्रकर्षेण जनोऽनु

रज्यते जनानुरागप्रभवा हि संपदः ॥१॥ हेतुमता सह हेतोरभिधानमभेदतो हेतुरिति हेत्वलंकारोऽत्र न लक्षितः। अ

: भूषणं सौ पूर्वतमियोदितरूपो यो वर्णक इति विहृतिर्वै चिन्त्यमानो वा। अविरलकमलविकासः सकलालिमदश्च को

किलानंदः। रम्योयमेति संप्रति लोकोत्कंठाकरः कालः। इसत्तु काव्यरूपता कोमलानुप्रासमहिम्नैव

समाम्नापि बुधः। नतु हेत्वलंकारकल्पनयेति पूर्वोक्तं काव्यलिंगमेव हेतुः। क्रियया तु परस्परं वस्तुनोर्जन

नेन्योन्यं। अर्थयोरेकक्रियामुखेन परस्परकारणत्वे सत्यन्योन्यं नामालंकारः। उदाहरणं। हंसाणं सरेहिं

सिरी सारिज्जइ अह सराण हंसेहिं। अस्से स्सं विअ एए अप्पाणं णवर गरुअंति। अत्रोभयेषामपि प

रस्परं जनकता। निषधः। श्रीसारता मिथः पादनद्धारेण। उत्तर श्रुतिमात्रतः। प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा

स्तति। असकृदर्थसंभाव्यमुत्तरं स्यात्तदुत्तरं। प्रतिवचनोपसंभादेव पूर्ववाक्यं यत्र परिकल्प्यते तदेकं

तावदुत्तरं। वाणिअअ हत्थिदंता कत्तो अह्माण वग्घकत्ती अ। जाव लुलिआलअमुहा घरम्मि परि

१२

का॰प्र॰ सक्करसोरुहा॥ हस्तिदंतव्याघ्रकृत्तीनां महमर्घ्यामूल्येनापि ताः प्रयच्छेतिति केदृवचनममुनावाक्येन समुद्बोधि
तो न वेदं काव्यलिंगं तत्रास्यतादूप्यानुपपत्तेः। नहि प्रश्नस्य प्रतिवचनं जनको हेतुः। नापि तन्नामानमेकध
र्मिनिष्ठतया साध्यसाधनतयोरनिर्देशात्। किंतु लोकोत्तरमेव साधायकः। प्रश्नादनंतरं लोकातिक्रांतगोचरत
या यदसंभाव्यरूपं प्रतिवचनं स्यात्तदपरमुत्तरम्। अनयोश्च सकृदुपादाने न चारुताप्रतीतिरिति सकृदि
त्युक्तं। उदाहरणम्। का विसमा देवगई किं लद्धं जं जणो गुणग्गाही। किं सोक्खं सुकलत्तं किं दुग्गेज्झं खलो लो
॥ परिसंख्यायामन्यव्यपोह एव तात्पर्यमिह तु वाच्यविश्रांतिरिति न चैरिविवेकः। कुतोपि लक्षितः सू
क्ष्मोप्यर्थोन्यस्मै प्रकाश्यते। धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते॥ कुतोपि आकारादिंगिताद्वा सूक्ष्मः स्थूल
मतिसंवेद्यः॥ उदाहरणम्। वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्दृष्ट्वा भिन्नं कुंकुमं कापि कंठे। पुंस्त्वं तन्व्या व्यंजयंती
वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख॥ अत्राकृतिमालोक्य कयापि वितर्कितं पुरुषायितमस्याः
लतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम्। पुंसामेव खड्गपाणित्वस्य पाणियोग्यत्वात्। यथा वा। संकेतका रा॰म॰

ता॰४

७१

लमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्॥ अत्र जिज्ञासितः संकेतका
लः कयाचिदिंगितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः। उत्तरोत्तरमु
न३ त्कर्षो भवेत्सारः परावधिः। परः पर्यंतभागोवधिर्यस्य धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रांतेः। उदाह
रणम्। राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्। सौधे तल्पं तल्पे वरांगनानंगसर्वस्वम्॥ भिन्नदेशतयात्यं
तं कार्यकारणभूतयोः। युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः॥ इह यद्देशं कारणं तद्देशमेव कार्यमुत्प
श्री द्यमानं दृष्टं। यथा धूमादि। यत्र हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभा
सनं सा तयोः स्वभावोत्पन्नपरस्परसंगतित्यागादसंगतिः। उदाहरणम्। जस्सेव वणो तस्सेअ वेअणा भणइ
तं जणो अलिअं। दंतक्खअं कवोले वहूइ वेअणा सवत्तीणं॥ एषा च विरोधबाधिनी न विरोधः। भि
न्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासनात्। विरोधे तु विरोधित्वमेकाश्रयनिष्ठमनुक्तमपि पर्य
वसितमपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः। तथा चैवं निदर्शितम्। समाधिः सुकरं कार्यं कारणा

क॰प्र॰ तरयोगतः। साधनांतरोपकृतेन कर्त्रीयस्के रोन कार्यमारब्धमाधीयते ससमाधिर्नामालंकारः। प्रा
नमस्पानिराकर्तुं पादयोर्मे पतिष्यतः। उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितं॥ समं योग्यतया [redacted]
[redacted] योगो यदि संभावितः क्वचित्। इदमनयोः श्लाघ्यमिति योग्यतया संबंधस्य नियतविषयमध्य
वसानं चेन्नदासमम्। तत्सद्योगे सद्योगे चउदाहरणम्। धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
त्वंपेदेवोप्ययमनुपमो दत्तपत्रः स्मरस्य। जातं दैवात्सदृशमनयोः संगतं यत्तदेतच्छृंगारस्योपनतमधुना रा
ज्यमेकातपत्रं॥ यथा वा। चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितरचनासंविधाता विधा
ता। यन्निंबानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलनकलाकोविदः काकलोकः॥१॥ क्वचि
दयं तिवैचित्र्यान्नश्लेषो घटना भिपात। कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत्। गुणक्रियाभ्यां
कार्यस्य कारणस्य गुणक्रियो। क्रमेण च विरुद्धे यत्स एव विषमो मतः। द्वयोर्यत्र विलक्षणतया
दनुपपद्यमानतयैव योगः प्रती[redacted]यते पद्य किंचिद्रसमाणः कर्त्री क्रियायाः प्रणात्प्रानान्न केवलमन

५१

ष्टं तस्फलं न लब्धं तावद्प्रार्थितमप्यनर्थं विषममा[redacted]सादयेन तथा सत्यपि कार्यस्य कारणानुरूपानुका
रेयनयोर्गुणो क्रियेच परस्परविरुद्धतां ब्रजतः स समविपर्ययात्मा च द्विरूपो विषमः। क्रमेणोदाहरणानि शि
रीषादपि मृद्वंगी क्वेयमायतलोचना। अयं क्व च कुकूलाग्निकर्कशो मदनानलः॥१॥ सिंहिकासुतसंत्रस्तः
शशः शीतांशुमागतः। जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥२॥ सद्यः करस्पर्शमवाप्य चित्रं रणे रणे य
स्य कृपाणलेखा। तमालनीला शरदिंदुपांडु यशस्त्रिलोक्या आभरणं प्रसूते॥३॥ आनंदममंदमिमं कुव
लयदलयोचनेददासि त्वं। विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे॥४॥ अत्रानंददानं शरीरतापेन वि
रुध्यते। विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये। मदविभ्रमासकलया पपे
पुनः स पुरस्त्रियैकतमयैकया दृशा॥ इत्यादावपि विषमत्वं योगमनुगतं व्यग्रा महतोयन्महीयां
सावाश्रितामाश्रययोः क्रमात्। आश्रयाश्रयिणोस्स्यातां तनुत्वेप्यधिकं ततः। आश्रितमाधेयमा
श्रयस्तदाधारः। तयोर्महतोरपि विषये तदपेक्षयातनू आश्रयाश्रयिणोः प्रकृतवस्तुप्रकर्ष

यपा २

कप्र· ९४

विवक्षायां यथाक्रमं पदं धिकृतरतां व्रजतस्तादिदं द्विविधमधिकं नाम्नाक्षिप्ते रसोदाहरणम्। अ
हो विशालं भूपाल भुवनत्रितयोदरं। माति मातुमशक्योपि यशोराशिर्यदत्र ते॥ पुनरत
काल्पप्रतिसंहृतात्मनो जगंति यस्यां सविकाशमासत। तनौ ममुस्तत्र न कैटभद्विषस्तपो
धनाभ्यागमसंभवा मुदः॥१॥ प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया। या तदीयस्य तत्स्तुत्यै
प्रत्यनीकं तदुच्यते। न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमसहेन केनापि यत्तमेव प्र
तिपक्षमुत्कर्षयितुं तदाश्रयस्य तिरस्करणं तदनीकप्रतिनिधितुल्यत्वात्प्रत्यनीकमभि
धीयते। यथानीके प्रयोज्ये तत्प्रतिनिधिभूतमपरं मूढतया केनचिदभियुज्यते तथेह प्रतियोगिनि वि
जेये तदीयोन्यो विजीयते क्रममपरं मूढतया केनचिदभियुज्यते तथेह प्रतियोगिनि वि[illegible]येतदी
योन्यो विजीयते इत्यर्थः। उदाहरणम्। त्वं विनिर्जितमनोभवरूपः सा तु सुंदर भवत्यनुरक्ता। पं
चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः॥ यथा वा। यस्य किंचिदपकर्तुमक्षमः राहुः

काय निग्रहगृहीतविग्रहः। कांतवक्त्रसदृशाकृतिं कृती राहुरिंदुमधुनापि बाधते॥ अइंदोरत्र त
दीयतासंबं[illegible]संबंधात्तासमेनलक्षणा वस्तु [illegible] वस्तु नायन्निगूह्यते। निजेनागंतुना वापि
तन्मीलितमिति स्मृतम्॥ सहजमागंतुकं वा किमपि साधारणं यल्लक्षणं तद्द्वारेण किंचित्से
न चिद्धि यद्वस्तु लिंगं त्वेव बलीयस्तया तिरोधीयते तन्मीलितमिति द्विधा स्मरंति। क्रमेणोदाहर
णम्। अपांगतरले दृशौ मधुरवक्रवर्णा गिरो विलासभरमंथरा गतिरतीव कांतं मुखम्। इति स्फुरित
मंगके मृगदृशां स्वतो लीलया तदत्र न मदोदयः कृतपदोपि संलक्ष्यते॥ अत्र वक्रलतादिकमंगस्य
लिंगं स्वाभाविकं साधारणं च मदोदयेन तत्राप्येतस्य दर्शनात्॥ ये कंदरासु निवसंति सदा हिमाद्रेस्त्व
त्पातशंकितधियो विवशा द्विषस्ते। अप्यंगमुत्पुलकमुद्वहतां सकंपं तेषामहो वत भियां न बुधो
प्यभिज्ञः॥ अत्र सामर्थ्यादवगतस्य शैत्यस्यागंतुकतया[illegible]नमभवयोरपि कंपपुलकयोः सा

१५

क.प्र. इष्टं प्रतीयते समानता च नयेष्वपि तयोरुपलक्षितत्वात्। ध्यो२. स्थाप्यते पोष्यते वा पियं [illegible] धा॰ पूर्वं परं परं। विशेष
णतया यत्र वस्तु सैकावली द्विधा। पूर्वं पूर्वं प्रति येन [illegible] रस्य वस्तुनो विशेषणभावेन यः स्थाप्य १२
पन निषेधो वा संभवति सा द्विधा बुधैरेकावली भणाप्यते। क्रमेणोदाहरणम्। पुराणि यस्यां सवरांगना नि
वरांगना रूपपुरस्कृतांगः। रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य॥६॥ न तज्जलं य
न्न सुचारुपंकजं न पंकजं तद्यदलीनषट्पदं। न षट्पदोसौ कलगुंजितो न यो न गुंजितं तन्न जहार यन्मनः
॥७॥ पूर्वत्र पुराणां वरांगनास्तासामंगविशेषणमुखेन रूपं तस्य विलासास्तेषामप्यस्त्रमनुना क्रमेण
विशेषणं विधीयते उत्तरनिषेधेप्येवमेव योज्यम्॥ यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम्। यः प
दार्थः केनचिदाकारेण यद्यप्यकदाचिदनुभूतोनूतः स कालांतरे स्मृतिप्रबोधायिनि तत्समाने वस्तुनि
दृष्टे यत्र चैव स्मर्यते तद्भवेत्स्मरणम्॥ उदाहरणम्। निम्ननाभिविवरेषु यदंभः पूरितं मृगदृशां [illegible] रा.म.

९९

लहरीभिः। तदेवैः कुहूरुतैः सुरनार्यः स्मारिताः सुरतकंठरुतानाम्॥ यथा वा। करजुअग्गहित्रजसोआ
यणमुहविणिवेसिआहरपुडस्स। संभरिमो पंचजन्नस्स गहकलहस्सरीणं चंदा॥ भ्रांतिमानन्यसंवित्तु
ल्यदर्शने। तद्विलन्यप्राकरणकं निर्दिश्यते तेन समानमप्युद्दिह्य प्राकरणिकमाश्रीयते। तस्य तथा
विधस्य दृष्टे सत्यां यदप्राकरणिकतया संवेदनं स भ्रांतिमा[illegible]न चैष रूपकं प्रथमातिशयोक्तिर्वा। त
त्र वस्तुतो भ्रमस्याभावात्। इह वा यथार्थानुगमनेन संज्ञाया प्रवृत्तेरेतस्य स्वरूपमेव प्रतिपन्नत्वात्। उदाहरणं
॥ कपाले मार्जारः पय इति करान्लेढि शशिनस्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति। रतांते तल्पस्था
न्हरति वनिताप्यंशुकमिति प्रभामत्तश्चंद्रो जगदिदमहो विप्लवयति॥ आक्षेप उपमानस्य प्रतीपमुप
मेयता। तस्यैव यदि वा कल्प्या तिरस्कारनिबंधना। अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति नार्थः किंचन
यदुपमानमाक्षिप्यते। यदपि तस्यैवोपमानतया प्रसिद्धस्योपमानांतरविवक्षयानादरार्थमुपमेयभा

ऊ॰

कप्र १५ वः प्रकल्प्यते । तदुपमेयस्योपमानप्रतीत▪वर्त्तित्वादुपमानप्रपंचप्रतापश्च । क्रमेणोदाहरणानि । तावस्य पौक्तसित
प्रतापगरिमणापथ्ये सरेस्पागिनां देवत्वप्यवनीमरक्तमंनुजे निष्पादित्तेवेधसा । इंदुः किं घटितः किमेष विहि
तः पूषा किमुत्पादितं चिंतारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ ७ ॥ एएहि दाव सुंदरि कसंमदाऊणा
सुणसु णसुवअणिज्जं ॥ तुज्झ मुहेण किसोअरि चंदोउवमिज्जई [redacted] वराओ ॥ अत्र मुखेन
उपमीयमानस्य शशिनः स्वल्पतरगुणत्वादुपमितिनिष्पत्तावस्फुरितपदानिवंधप्रवृत्तिसंस्कारः । कवि
नु निष्पन्नैवोपमितिक्रियानादरणानिबंधनश्च । यथा गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मु
▪ मुग्धे । संतीदृशानि दिशि दिशि सरस्सु ननु नीलनलिनानि ॥ ९ ॥ इतीहोपमेयोपलालनमनादरः । अनये
वरार्ह्यदस्यामान्यगुणायोगात्वेयमानभावमप्यननुभूतपूर्वस्मृहनेतत्स्यतत्कल्पना यामपि भवति
प्रत्तापमितिप्रसेतव्यश्च । यथा । अहमेव गुरुः सुदारुणानामिति हालाहल तात मास्म दृप्यः । ननु सं राम·

तिमवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥ १० ॥ अत्र हालाहलस्योपमानत्वं असंभाव्यमेवोप
ब२ ▪दृशः । प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया । ऐकात्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतश्च ॥ अतादृशा
मपि तादृशतया विवक्षितं यत्प्रस्तुतमप्रस्तुतपदार्थेन संसृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया
निबध्यते तत्समानगुणसंबंधात्सामान्यम् । उदाहरणम् । मलयजरसविलिप्ततनवो नवहारलता विभूषिता
त्र सिततरदंतपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः । शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयांति सुखमेव निरस्तभियोऽभिसारिकाः ॥ ११ ॥ अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निब
द्धधवलत्वमेकात्मताहेतुः । अत एव पृथग्भावेनानयोरुपलक्षणम् । यथा वा । वेत्रत्वचा तुल्यरुचां व
धूनां कर्णाग्रतो गंडतलागतानि । भृंगाः सहेलं यदि नापतिष्यन् को वेदयिष्यन्नववंपकानि ॥ १२ ॥ अत्र
निमित्तांतरजनितापि नानात्वप्रतीतिः प्रा▪मप्रतिपन्नमभेदं न व्युदसितुमुत्सहते प्रतीतत्वात्तस्य प्रतीते
थ॰

१६
कप्र अबाधायोग्यत्वात्। विनाप्रसिद्धमाधारमाधेयस्य व्यवस्थितिः। एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा॥
अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः॥ ॥ तथैव करणं चेति विशेषस्त्रिविधः स्मृतः॥ प्रसिद्धाधा
रपरिहारेणायदाधेयस्य विशिष्टस्थितिरभिधीयते स प्रथमो विशेषः उदाहरणम्। दिवमप्युपयाता ना
माकल्पमनल्पगुणगणा येषाम्। रमयंति जगंति गिरः कथमिव कवयो न ते वंद्याः॥ एकमपि च वस्तु यदे
केनैव स्वभावेन युगपदनेकत्र वर्त्तते स द्वितीयः। उदाहरणम्। सा वसइ तुम्ह हिअए स च्चिअ अच्छीसु सा अ वअ
णेसु। अम्हारिसाण सुंदर ओआसो कत्थ पावाणं॥ यदपि किंचिदारभमाणस्तेनैव यत्नेनाशक्यमपि
कार्यान्तरमारभते सोऽपरो विशेषः। उदाहरणम्। स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजताऽनवद्यविद्यः
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥ यथा वा गृहिणी सचिवः सखी मिथः प्रि
यशिष्या ललिते कलाविधौ। करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्॥ सर्वत्रैवंविधे वि
षयेतिशयोक्तिरेव प्राणत्वेनावतिष्ठते। तां विना प्रायेणालंकारत्वायोगात्। अत एवोक्तम्। सैषा सर्वत्र श्र.

वक्रोक्तिरनयार्थो विभाव्यते। यत्नोस्यां कविना कार्यः कोलंकारोनया विना॥ स्वमुत्सृज्य गुणं योगा
दत्युज्ज्वलगुणस्य यत्। वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः॥ १२॥ वस्तु तिरस्कृतनिजरूपं केनापि स
मीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं तत्प्रतिभासमेव यत्समासादयति स तद्गुणः। तस्याप्रकृतस्य
गुणेनाक्रान्तत्वात्। उदाहरणम्। विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरंत्या। रत्नैः पुनर्यत्र रुचा
रुचि स्वामानिन्यिरे वंशकरीरनीलैः॥ ॥ अत्रावितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां
प्रगुणवर्णता॥ तद्रूपाननुहारश्चेदस्य तत्स्यादतद्गुणः॥ यदि तु तद्रूपं संभवंत्यामपि योग्यतायां
न न्यूनगुणेन गृह्यत्यात् तदा भवेदतद्गुणो नाम। उदाहरणम्। धवलोसि जइ वि सुंदर तहवि तुए मज्झ रं
जिअं हिअअं। राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि॥ ॥ अत्रातिरक्तेनापि मनसा संयु
क्तो न रक्ततामुपगतः स्यात् तद्गुणे किंचिदप्रकृतमस्येति वप्रकृतमत्र निर्दिश्यते तेन यत्र प्रकृ

क.प्र. रूतस्पन्नपं प्रकृतेन कृतोपि निमित्तानुविधायते। सोऽतद्गुणाद्भिन्नत्वपि प्रतिपन्नस्वरूपः। यथा। गांगमं
बुसितमंबु यामुनं कज्जलाभमुभयत्र मज्जतः। राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते॥१॥
यद्यथा साधितं केनाप्यपरेण तदन्यथा। तथैव तद्विधीयेत स व्याघात इति स्मृतः॥१॥ येनोपायेन यत्पदेकेनो
पकल्पितं तस्मादन्येन विजिगीषुतया तदुपायकमेव यदन्यथाकरणं स साधितवस्तुव्याहतिहेतुत्वाद्व्या
घातः। उदाहरणं। दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः।२। से
ष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः। एतेषां समनन्तरमेवोक्तस्वरूपाणामलंकाराणां यथासंभवमन्योन्य
निरपेक्षतया यदिह शब्दभागे एवार्थविषये एवोभयत्रापि चावस्थानं सैकार्थसमवायस्वभावा संसृष्टिः॥
तत्र शब्दालंकारसंसृष्टिः। कुसुमसौरभलोभपरिभ्रमद्भ्रमर[redacted]संभृतशोभया। चलित[redacted]या विदधे क
लमेखलाका[redacted]लकलोलकलोलदृशान्यया॥१॥ अर्थालंकारसंसृष्टिः। लिंपतीव तमोऽङ्गानि वर्षतीवांजनं न
भः। असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता।३। पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजय

संभ्रमर

२२

यतः। उत्तरत्र तथाविधावुपमोत्प्रेक्षे। शब्दार्थालंकारयोस्तु संसृष्टिः यथा। सो णत्थि एत्थ गामे जो
एअं महमहंतलावण्णं। तरुणाण हिअअलूडिं परिसक्कंतिं णिवारेइ॥१॥ अत्रानुप्रासोत्पेक्षे वा
न्योन्यानपेक्षे संसर्गमूलतयोरेकत्र वाक्ये दृसिवासमवेतत्वात्। अविश्रांतिजुषामात्मन्यंगांगि
त्वं तु संकरः। एत एव तु यत्रात्मन्यनासादितस्वतंत्रभावाः परस्परमनुग्राह्यानुग्राहकतां दध
ति स एषां संकीर्यमाणस्वरूपत्वात्संकरः। उदाहरणं। आत्ते सीमंतरत्ने मरकतिनि हृते हेमताटंक
के पत्रे लुप्तसौम्ये रवलायां हृति मणितुलाकोटियुग्मे गृहीते। शोणं बिंबोष्ठकांत्या त्वदरिमृ
गदृशामित्वरीणामरण्ये राजन् गुंजाफलानां स्रज इति शबरा नैव हारं हरंति॥१॥ अत्र तद्गुणमपे
क्ष्य भ्रांतिमता प्रादुर्भूतं तदाश्रयेणाचतद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्योरंगांगिभा
प्रतीयते। यथा वा। जटाभाभिर्भाभिः करधृतकलंकाक्षवलयो वियोगिव्यापत्तेरिव कलि

हा ति २

१८ ७५

कप्र नवैसा[illegible]विशदः। परिपूर्णंरवर्तुरा परिकारकपालैकितनलेशश्रा मस्मापांडुपित्तवनद्रवव्योम्निचरति।
उपमान्तपक्षमुत्प्रेक्षा श्लेष[illegible]श्चेतिच त्वारोत्रपूर्ववैगांगितया प्रतीयंतो कलंके एवान्तर्वलयमि ९२
तिचरूपकंपा शिग्रहे करधृतत्वमेवसाधकप्रमाणातो प्रतिपद्यतो अस्यहि रूपकत्वेतिरोहित
कलंकरूप आन्तर्वलयमेव मुख्यतया वाग्म्यतोतस्यैव चकारग्रहणायोग्यंया सा वीतिकी प्र ता४
सिद्धिः श्लेषघटा यया तु कलंकस्य करधारणामसद्देव प्रत्यासत्योपवर्ण[illegible]तो दृशांकेन
केवलं कलंकस्य मृत्तैर्बोद्धहनात्कलंको न्तर्वलयमिवेति तूपमायां कलंकस्य त्करत पाप्र
तिपत्तिर्नवास्य करधृतत्वं नस्ततो [illegible] तिमुख्ये प्युपचार एवेशरणंस्यात एवं विधस्वरूप
संकरः शब्दालंकारयो रापिद्रूपतो यथा। राजति तटीयमभिहतदानवरासा तिपाति सारा
वनदा। गजतता च[illegible]थमविरत दानवरा तिपाति सारा वनादा। १। अत्रयमकमनुलोमप्रतिम·

९२

९३

प्रतिलोमश्चवित्रभेदः। पादद्वयगतिपरस्परापेक्षो। एकस्य च ग्रहेन्यायदोषाभावादनिश्चयः। द्वयो
र्वक्रोनावालंकाराणामेकत्र समावेशोपि विरोधात्तत्र युगपदवस्थानासंभवः। नवैकतरस्य परि
ग्रहे साधकं तदितरस्य परिहारे वा बाधकमास्ति येनैकतर एव सपरिगृह्येतातः सनिश्चयाभावन्नूपो द्वि
तायः सीकाराः समुच्चयेन संकरस्यैवान्तःपात। उदाहरणम्। जह गहिरो जर अणानिज्झरो जह अणिमलच्छ
र्ता किं विहिआए सो सर सवाणीउ जलणिहीणा कओ। ३। अत्र सुडुप्रस्तुते विशेषणसाम्यादप्रस्तुता ३१
र्ता किं विहिणा एसो सरसवाणीउ जलणिहीणा कओ
र्थप्रतीतेः किमसौ समासोक्तिः किमचिर प्रस्तुतस्य मुखेन वनकस्यापि तत्समानगुणतया प्रस्तुतस्य प्रति
स्ह पत्तेरियमप्रस्तुतप्रशंसेति संदेहः। यथा वा नयनानंददायींदोर्बिंबमेतत्प्रसादति। अधुना पिनिरुद्धाशम
विशारीमिदं तमः। ४। अत्र किं कामस्योद्दीपकः कालो वर्त्तत इति भंग्यंतरेणाभिधानात्पर्यायोक्तमुत
वदनस्येंदुबिंबतयाध्यवसायमानादतिशयोक्तिः। किं चेतदितिवक्रनिर्दिश्यतद्रूपारोपवशाद्रूपकम

१९ ८२

कप्र यैवैतयोःसमुच्चयविवक्षायांरूपकमथवातुल्ययोगिता किमुप्रदोषसमयेविशेषणासाम्यादानं[redacted]स्या
वगतौसमासोक्तिराहो।स्विन्मुखनैर्मल्यप्रस्तावादप्रस्तुतप्रशंसेतिबहुसंदेहाद्रूपमेवसंकरः।यत्रन्या
यदोषयोरन्यतरस्यावतारस्तत्रैकतरस्यनिश्चयान्नसंशयः।न्यायश्चसाधकत्वमनुकूलता।दोषोपि
बाधकत्वंप्रतिकूलता।तत्रांसोभागंपवितनोतिवक्त्रंशशिनोज्योत्स्नेवहासद्युतिरित्यत्रमुखव्यतयावग
म्यमानाहासद्युतिर्वक्त्रएवानुकूल्यंभजतइत्युपमायाःसाधकं।शशिनितुनतथाप्रतिकूलेतिरूप
कंप्रतितस्याबाधकताव।वक्त्रेंदौतवसत्ययंयदपरःशीतांशुरभ्युद्यतइत्यत्रापरत्वमिंदोरनुगुणंन
तुवक्त्रस्यप्रतिकूलमितिरूपकस्यसाधकतांप्रतिपद्यते।नतूपमायाबाधकतां।राजनारायणंलक्ष्मी
स्त्वामालिंगतिनिर्भरमित्यत्रपुनरालिंगनमुपमांनिरस्यति।सदृशंप्रतिप्रेयसीप्रयुक्तस्यालिंगनस्या
संभवात्।आनंदमंथरपुरंदरमुक्तमाल्यंमौलौहठेननिहितंमहिषासुरस्य।पादांबुजंभवतुवोविजया
यमंजुमंजीरसिंजितमनोहरमंबिकायाः॥१॥इत्यत्रमंजीरसिंजितमंबुजेप्रतिकूलमसंभवादिति रू रूप

पकस्यबाधकं।ननुयादृगनुकूलमित्युपमायाःसाधकमभिधायते।विध्यपमर्दिनोबाधकस्यतद
पेक्षयाउत्कटत्वेनप्रतिपत्तेः।एवमन्यत्रापिसुधीभिःपराहृष्टव्यं।स्फुटमेकत्रविषयेशब्दार्थालंकृति
द्वयम्।व्यवस्थितंच।अभिन्नएवपदेस्पष्टतयाय[redacted]भावपिशब्दा[redacted]लंकारौव्यवस्थितौसमासादयतः
सोप्यपरःसंकरः।उदाहरणम्।स्पष्टोच्छसत्किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकमथोदिवसारवि
दं।श्लिष्टाष्टदिग्दलकलापमु[redacted]वतारवद्धांधकारमधुपावलिसंवुकोचा॥१॥अत्रैकपदानुप्रविष्टौ
रूपकानुप्रासौ॥तिनासौत्रिरूपःपरिकीर्तितः।तदयमनुग्राह्यानुग्राहकतयासंदेहेनैकपदप्रतिपा
द्यतयाचव्यवस्थितत्वात्त्रिप्रकारएवसंकरोव्याहृतः।प्रकारांतरेणानुगशक्या।व्याकर्तुम्।आनंत्या
त्तस्यभेदानामिति।प्रतिपादिताःशब्दार्थोभयगतत्वेनत्रैविध्यजुषोलंकाराः।कुतःपुनरेषनियमो
यदेतेषांतुल्येपिकाव्यशोभातिशयहेतुत्वेकश्चिदलंकारःशब्दस्यकश्चिदर्थस्यकश्चिदुभय

कस्पेतिचेन्नानुक्तमत्रयथाकाव्येगुणदोषालंकाराणांशब्दार्थोभयगतत्वेनव्यवस्थायामन्वयव्यति
रेकावेवप्रभवतोनिमित्तांतरस्याभावात्।तत्तस्त्वयोलंकारोयदाश्रयान्वयव्यतिरेकोअनुविधत्तेस
सतदलंकारोव्यवस्थाप्यतइति।एवंचयथापुनरुक्तवदाभासपरंपरितंरूपकंचोभयोर्भावाभावा
नुविधायितयोभयालंकारौ।तथाशब्दहेतुकार्थांतरन्यासप्रभृतयोपिद्रष्टव्याः।अर्थस्यतुत
त्रैववैचित्र्यमुत्कटतयाप्रतिभासतइतितेवाच्यालंकृतिमध्येवस्थितिमनपेक्ष्यैवलक्षि
ताः।योलंकारोयदाश्रितःसतदलंकारइत्यपिकल्पनायामन्वयव्यतिरेकावेवसमाश्रयितव्यौ।तदाश्रयणमंतरेणविशिष्टस्याश्रयाश्रयिभावस्याभावादित्यलंकाराणांयथोक्तेनिमि
स्पर त्तएवपरंव्यतिरेकोन्यायाश्च।एषांदोषायथायोगंसंभवंतोपिकेचनानुक्ताःस्वतःपातितीतिनपृ
थक्प्रतिपादिताः॥तथाह्यनुप्रासस्यप्रसिद्ध्यभावोवैफल्यंवृत्तिविरोधइति।यत्रपदोषाश्र

त्प्रसिद्धिविरुद्धत्वमपुष्टार्थत्वंप्रतिकूलवर्णतावयथाक्रमेनाक्रामंतितान्स्वभावात्।क्रमेणोदा
हरणानि।चक्रीचक्रारपंक्तिंहरिरपिचहराञ्शृ्धूर्जटिर्धूर्ध्वजांतानातनूंतत्त्वेनाथोरुणमपिवरुणः कु
बराग्रंकुबेरः।रंहःसंघःसुराणांजगदुपकृतयेनित्ययुक्तस्ययस्यस्तोतिप्रीतिप्रसन्नोन्वहमहिमरुचेः
सोवतात्स्यंदनोवः।१।अत्रकर्तृकर्मप्रतिनियमेनस्तुतिरनुप्रासानुरोधेनेवप्रतिपादितानपुराणे
तिहासादिषुतथाप्रतीतेतिप्रसिद्धिविरोधः।नरणातरुणीरमणामंदिरमानंदस्यंदिसुंदरेंदुमुखि।
४ ६२ यदिसल्लीलोल्लासिनिगच्छसितत्किंत्वदीयंमे।२।अनरणुरणन्मणिमेखलमविरतसिंजानमंजुमंजी
रंयरिसरणा[redacted]मरुणाचरणोरणरणकमाकरणांकुरते।अत्रवाच्यस्यविचिंत्यमानंनकिंचिदपिवा
रुत्वंप्रतीयतइत्यपरिपुष्टार्थतेवानुप्रासस्यवैफल्यम्।अकुंठोत्कंठेतिशृंगारेपरुषवर्णाडंबरःप्र
वैक्रीत्यपाविरुद्धयतइतिपरुषानुप्रासोत्रप्रतिकूलवर्णतेवबद्धत्तिविरोधः।यमकस्यपदत्रयगतत्वे

२१

क्ष त्वेनयमक्रमप्रयुक्तत्वं दोषः। भुजंगमस्येव मणिः सदंभा ग्राहावकीर्णेव नदी सदंभा। दुरंततां निर्णायते
पिकोऽपीति चेतःप्रमुखे सदंभाः॥१॥ उपमायां वा उपमानस्य जातिप्रमाणगतन्यूनत्वमधिकता वा
तादृश्यनुचितार्थत्वं दोषः। धर्मीश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिच
रतः। उदाहरणं। चंडालैरिव युष्माभिः साहसं परमं कृतम्। वह्निस्फुलिंग इव भानुरयं चकास्ति। पा
अयं पद्मासनासीनश्चक्रवाको विराजते। युगादौ भगवान्वेधा विनिर्मित्सुरिव प्रजाः॥ पातालमिव ना
भिस्ते स्तनौ क्षितिधरोपमौ। विराजते द्विजः पुतरयं कालिंदीपानसंनिभः॥११॥ अत्र चंडालादिभिरु
पमानैः प्रस्तुतोऽर्थोऽस्पृष्टमेव कदर्थित इति अनुचितार्थता। मृदुनिर्लोठितो मोज्यामसृष्टा जि
नपदं वहतः। व्यराजन्नालजाम्बूतभागा श्लिष्ट इवाम्बुमाद्युः। अत्रोपमानस्य मोत्तीस्वानाः य
यन्तादिव्यत्वगोधर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम्। स पीतवासाः प्रगृहीतशारां

र्ङ्गो मनोज्ञभामं वपुराप कृष्णः॥ शतक्रतुं दैत्यायुधवान्दिशायां संस्त्यमानाः शशिनेव मेघाः॥३॥
अत्रोपमेयस्य शांरवादेरनिर्देशो शशिनो ग्रहणमतिरिच्यत इत्यधिकपदत्वम्। लिंगवचनभे
द्युपमानोपमेययोः साधारणं चेद्धर्ममन्यतररूपं कुर्यान्नैकतरस्यैव तद्धर्मसमन्वयावगतेः सवि
शेषणस्यैव तस्योपमानत्वमुपमेयत्वं च प्रतीयमानेनापि धर्मेण प्रतीयेत इति प्रक्रांतस्यार्थ
स्य स्फुटमनिर्वाहात्तस्य भग्नप्रक्रमरूपत्वम्॥ यथा चिंतारत्नमिव च्युतासि करतो धिग्मं
दभाग्यस्य मे सक्रवो भक्तिता देवशुद्धाः कुलवधूरिव। च तु नानात्वे लिंगवचसोः सामान्याभिधा
यिपदं स्वरूपभेदं नापद्यते तत्र नैतद्दूषणावतारः। तु भय यथा यस्यानुगमकन्नमस्वभावत्वात्। यथा गु
णैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः। तद्वेषोसदृशोन्याभिः स्त्रीभिर्मधुरता भृतः॥१ दधते स्मपरां
शोभां तदीया विभ्रमा इव। कालपुरुषाविध्यादिभेदेपि न तथा प्रतीतिरस्खलितरूपतया वि

[illegible] २२ विश्रांतिमासादयतात्यसावपि नग्रप्रक्रमते यैवं व्याख्येयः। यथा वा अत्र तिथिं नाम काकुत्स्थस्तुन
माप कुमुद्वती। पश्चिमाद्याभिनायामात्प्रसादं भिव चेतना॥६॥ अत्र चेतनाप्रसादं माप्रोतिन
पुनरावेति कालभेदः। प्रत्यग्रमज्जनविशेषविविक्तमूर्त्तिः कोयं भरागरुचिरस्फुरदंशुकांत
विभ्रत्तसेमकरकेतनमर्वयंता वालप्रवालविटपप्रभवा लतेवा॥८॥ अत्र लता विभ्राजते ननु वि
भ्राजत इति सी वोध्यमानीनष्ठस्यपरभागस्यासंवोध्यमानविषयतयाव्यस्या सादृश्यः भे
दः। गंगेव प्रवहतु तेसैदेवकीर्त्तिरित्यादौ गंगा प्रवहति न तु प्रवहत्विति अप्रवृत्तप्रवर्त्तनात्म
नो विधेरेवं जातीयकस्य चान्यस्य उपमानाऽप्रवृत्तस्यासंभवाद्विध्यादिभेदः। ननु समानमुद्य
रितं प्रतीयमानवाधर्मांतरमुपादायपर्यवसितायामुपमायामुपमेयस्य प्रकृतधर्मी [illegible]
धान्तकश्चित्कालादिभेदोस्तीति यत्राप्युपात्तेनैव समानधर्मेणोपमा च [illegible] स्यते। [illegible]

युधिष्ठिर इवायं सत्यं वदतीति तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्त्या भ
हे सत्यवादी सत्यं वदतीति च न पौनरुक्त्यमाशंकनीयम्। शरे पोषं पुष्णातीतिवत्। युधि
र इव सत्यं वदनेन सत्यवाद्ययमित्यर्थावगमात्। सत्यमेवं तत्तु किंतु स्थितेषु प्रयोगेषु समर्थनमि
दं न तु सर्वथा निरवद्यः। अप्रस्तुतवस्तुप्रतीतिविघातादिति सचेतनसमए वात्र प्रमाणम्॥ अत्र सादृश्यो सम
वावप्युपमायामानुचितत्वर्थतायामेव पर्यवस्यतः। यथा ग्रथ्नामिकाव्यशशीनं विततार्थरश्मिं। अत्र का
स्यशशिना अर्थीनां च रश्मिभिः साधर्म्यमुक्त्वापि न प्रतातमित्यनुचितार्थत्वम्। निपेतुरास्याद्[illegible]स्य
दीप्ताः शराधनुर्मंडलमध्यभाजः। जाज्वल्यमाना इव वारिधारा दिनार्द्धभाजः परिवेषिणोर्कात्॥१॥ अत्र
पिक्ष्लसंत्सोंवुधारार्यं मंडलाद्विपतंतस्योन संभवतीत्युपनिवध्यमानो र्थ अत्र नो चित्यमेव पुष्णाति
उत्प्रेक्षायामपि संभावनं ध्रुवेवादयप एव शब्दाः व कुर्मुत्तं हे तेन यथा शब्देऽपि केवलस्यास्य साधर्म्य[illegible]

...त्रिपादयितुं पर्यायसत्वान्तरं भावनामविवक्षितत्वादिति तत्राशक्तस्यावाचकत्वं दोषः। यथा। उद्यद्‌यो
...र्धे ...ग भोग्नुकूलमेव कोमलतल्पं। नारी लोचनवानुं च्यां शक्ता संक्रचिंतयय्या। उत्प्रेक्षितमपि ता...
केनरूपेणपरिवर्जितत्वात् निरूपाख्यप्रख्यं तत्त्समर्थनाययदृथ्यो तरन्यासस्योपादानं तदा लेख्य मिदं...
शालेस्यन्नमसमाचानमिति निर्विषयत्वमेवास्यानुचितत्वमेवदोषः। यथा दिवाकराद्रक्षति ...गु
मुक्तानं दिवा माल मिवांधकारं क्षुद्रेपिनूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव। अत्र ...तेन
नमसोदिवाकराद्रास एवनसंभवति कृतवतस्त्रयोजितमा... परित्राणं संज्ञावितेनतु नूपेर... मा
समानस्यास्यनकाविद्‌नुपपन्निरवतारतातिव्यर्थ एवतत्त्समर्थनार्थ्ययत्नः। साधारणविशे... ताव
शादेवसमासोक्तिरनुक्तमप्युपमानविशेषं प्रकाशयतीति तस्यात्रपुनरुपादाने प्रयो...जनाः...
...देयताय...दपुष्टार्थत्वं पुनरुक्तता वादोषः। यथा। स्पृशति तिग्मरुचौ ककुभः करैर्दयित...वति...

जिनतापयाः। अतनुमानपरिग्रहया स्थितरुचिरया चिरयापिदिनश्रिया। ६॥ अत्र तिग्मरु...कुभो
यथासदृशविशेषणप्रवेशेन व्यक्तिविशेषपरिहारेण वनायकतयानापिकतया च व्यक्तिस्तथा ग्रीष्म
दिवसश्रियोपि प्रतिनायिकास्वेन भविष्यतीति किं दृयितयेति स्वशब्दोपादानेनाऽऽस्वोद्यायमायारु
स विषयोयत्रोपमानस्योपादानमन्तरेणसाधारणेष्वपिविशेषणेषु न तथा प्रतीतिः। यथा। स्वयं
पल्लवाताम्रभास्वत्कर विराजिता। प्रभातसंध्येवास्वापफललुब्धेहितप्रदा। ७। इति। अत्र प्रस्तुतप्र...
साया मपि उपमेयमनूर्यैवरात्याप्रतीतं न पुनः प्रयोगेणकदर्थनायस्य। यथा। आह्वतेषु विहंगमेषु
मशको नायान्पुरो वार्यते मध्ये वाधुरिवावसंकृत्तु णामणिर्धत्ते मणानां रुचं। खद्योतोपि न कंपते
...प्रचलितुं मध्येपि तेजस्विनां धिक् सामान्यमचेतनं प्रभुमिवानामृष्टतत्वान्तरं। ८। अत्राचेतनः प्र
स्तुतः ...शिष्टसामान्यद्वारेणाभिव्यक्तो युक्तमेवपुनः कथनं। तदेतेलकारदोषाः पर्यासंभवति...

५४ श्री। न्यप्येवंजातीयकाः पूर्वोक्तेभ्यो वैशेष्यवत्तात्या अन्तर्भाविता न पृथक्प्रतिपादनमर्हन्तीति संप्राप्तमिदं का

व्यलक्षणम् ॥ इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत्। न तद्विचित्रं यदमुत्र सम्यग्वि

निर्मिता संघटनैव हेतुः ॥१॥ ॥इति श्री काव्यप्रकाशे अर्थालंकारनिर्णयो नाम दशम उल्लासः ॥१०॥

॥श्री श्रीमद्विष्णुगुरोराज्ञयायं काव्यप्रकाशं दशमोल्लासः समाप्तः॥ ॥संवत्सरे विधुधनंजयसेधवे

कयुक्ते ज्येष्ठे वहलपक्षपुते शशांके। वारे शुभे प्रतिपदि प्रतिपद्य सम्यक् काव्यप्रकाशं दशमोल्लसनं लिखि राम

रव॥१॥ ॥श्रीगुरुजीपतरह्॥ ॥श्री॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥